CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आस्ये तु जिह्वावासश्च[1] आस्यानां बुद्धि[2]वासनम् ।
बुद्ध्यर्णं हृदये वासम्[3] हृदयं पिण्डवासनम्[4] ॥ ५० ॥
पिण्डार्णं वासयेन्नाड्यां[5] नाडीनां वायुवासनम्[6] ।
वायुवासश्च[7] शक्तीनां शक्तिवासंच[सश्च][8] वै शिवः ॥ ५१ ॥
शिववासंच[सश्च] सर्वेषां मन्त्रवासं[सः][9] प्रकीर्तितम्[तः][10] ।

आस्यं अक्षराश्रयभूतजिह्वायाः वासस्थानम् । बुद्धिः आस्यानां वासस्थानम् । हृदयं शब्दानुविद्धबुद्ध्यक्षरवासस्थानम् । पिण्डं बुद्धि-व्यापारकारणभूतहृदयस्य वासस्थानम् ॥ ५० ॥

नाडी पिण्डाक्षरवासस्थानं भवति । वायुः नाडीनां वासस्थानम् । शक्तयः वायोः वासस्थानम् । शिवः शक्तीनां वासस्थानं भवति ॥ ५१ ॥

स शिवः सर्वेषां वासस्थानं भवति । एवं मन्त्रवासः निरूपितः ।

---

1. जिह्वास्ये तु वासं च–ग. च.
2. बुद्ध–ग. च.
3. वासो–फ.
4. वासने–फ.
   वासकम्–ध.
5. पिण्डार्णं वासयेन्नाडी–क. घ. छ. ट. ठ. ढ. त. थ. द. ध. प.
   पिण्डात्तु वासयोर्नाडी–फ.
   पिण्डार्णं वासयेन्नाड्याः–ग. च. झ.
6. वायुरासनम्–फ.
   वायुवासकम्–ध.
7. वायुवासनं–प.
   वायुरासनं ·फ.
8. शक्त्यावासं–क. ख. घ. छ. ढ. त. थ. द.
9. मन्त्रावासं -प.
10. उदीरितम्–फ.
    इदं प्रोक्तम्–क. ग. घ. च. छ. ज. झ. ट. ठ. ढ. त. थ. द. ध. प.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[शिवस्यैव सर्वावासत्वदृढीकरणम्]

नित्यो नैमित्तिकश्चैव परं चापरमेव च[1] ॥ ५२ ॥
सच्चासच्च सुरश्रेष्ठ! कर्तृ भर्तृ तथैव च ।
हृद्यं चैव तथाऽहृद्यं अद्य ह्यः श्वस्तथैव च ॥ ५३ ॥
वाच्यं च वाचकं यत्तत् आधाराधेयमेव च ।
सुस्थितं दुःस्थितं चैव चलं चाचलमेव च ॥ ५४ ॥
शीतमुष्णं च यत् प्रोक्तं सुखं दुःखं तथैव च ।
पवित्रं चापवित्रं च मृदुतीक्ष्णं तथैव च ॥ ५५ ॥
रागद्वेषं च यज्ज्ञानं यच्चालभ्यं तथैव च ।
उन्नतं चानतं चैव सम्पच्चासम्पदेव च ॥ ५६ ॥

इदानीं शिवस्यैव सर्वावासत्वं द्रढयति—नित्य इति । हे सुरश्रेष्ठ! नित्यः, नैमित्तिकः, परं अपरम्— ॥ ५२ ॥

—सत्, असत्, कर्तृ, भर्तृ, हृद्यं, अहृद्यं, अद्य, ह्यः, श्वः— ॥ ५३ ॥

—वाच्यं वाचकं आधारः आधेयः सुस्थितं दुस्थितं चलं अचलम्— ॥ ५४ ॥

—शीतं उष्णं सुखं दुःखं पवित्रं अपवित्रं मृदु तीक्ष्णम्— ॥५५॥

—रागज्ञानं द्वेषज्ञानं अलभ्यं उन्नतं आनतं सम्पत् असम्पत्— ॥ ५६ ॥

---

1. इत आरभ्य "सदाशिवसमाश्रिता" इत्यन्तो भागः—क. ख. घ. छ. ज. ट. ठ. ढ. त. थ. द. प. फ. पुस्तकेषु न दृश्यते । किन्तु—ग. च. झ. पुस्तकेषु "आस्ये तु जिह्वावासश्च आस्यानां बुद्धिवासनम्" इति पद्यार्धानन्तरं दृश्यमानोऽप्ययं भागः विषयानुबन्धौचित्यवशात् अत्रैव योजितः ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वमेतच्च देवेशः तस्मादन्यन्न विद्यते ।
प्रकृतिश्शब्दमात्रं तु रूपमात्रं तथा परम् ॥ ५७ ॥
रसमात्रं गन्धमात्रं श्रोत्रं त्वक् चक्षुरेव च ।
जिह्वा घ्राणं च वाक्पाणिपादं पायुरुपस्थकम् ॥ ५८ ॥
मनसा च पृथिव्यादिपञ्चकं पुरुषेण तु ।
राग[गो] माया च विद्यां[द्या] च कला नियमं[म] एव च ॥५९॥
विग्रहेशंच[श्च] शक्तिंच[क्तिश्च] शुद्धमायां[या] तथैव च ।
शुद्धविद्या शुद्धकला सदाशिवः शिवं विदुः ॥ ६० ॥
ईश्वरं च[रश्च] स एव स्यात् स एवाहं भवांस्तथा ।
स एव देवब्रह्मादि[ः] कश्यं[श्य]पाद्यप्रजासृजाः[जः] ॥ ६१ ॥

—इत्येतत् सर्वं देवेशः शिव एव । एतस्माच्छिवादन्यत् किमपि नास्ति । मूलप्रकृतिः शब्दतन्मात्रं रूपतन्मात्रं स्पर्शतन्मात्रम्— ॥५७॥

—रसतन्मात्रं गन्धतन्मात्रं श्रोत्रेन्द्रियं त्वगिन्द्रियं चक्षुरिन्द्रियं जिह्वेन्द्रियं घ्राणेन्द्रियं वागिन्द्रियं पाणीन्द्रियं पादेन्द्रियं पाय्विन्द्रियं उपस्थेन्द्रियम्— ॥ ५८ ॥

—मनः पृथिव्यादिपञ्चभूतानि पुरुषः रागः माया विद्या कला नियतिः— ॥ ५९ ॥

—विग्रहेशः शक्तिः शुद्धमाया, शुद्धविद्या, शुद्धकला, सदाशिवः इत्येतत् सर्वं शिव एव ॥ ६० ॥

ईश्वरश्च शिवतत्त्वमेव । अहं भवांश्च शिवतत्त्वमेव । ब्रह्मादयः सर्वे देवाः कश्यपादयश्च सर्वे प्रजापतयश्च शिवतत्त्वमेव ॥ ६१ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स एव मुनयः सप्त चन्द्रादित्यौ ग्रहेश्वरौ ।
स एव देवराजोऽपि कुबेरो वरुणस्तथा ॥ ६२ ॥
सयमोऽग्निश्च नागेशः निर्ऋतिर्वायुरेव च ।
ईशानो गणपाः सर्वे वसवोऽष्टौ तथैव च ॥ ६३ ॥
रुद्रा एकादशान्येऽपि देवदानवपुङ्गवाः ।
दैवमष्टविकल्पं च धैर्यमन्योन्यपञ्चकम् ॥ ६४ ॥
मानुष्यं च जगत् कृत्स्नं स एव शिव उच्यते ।

[शिवस्यैव सर्वविद्याप्रतिपाद्यत्वम्]

चत्वारश्च तथा वेदाः रहस्येन वदन्ति किम् ॥ ६५ ॥
सिद्धान्ते भूततन्त्रे च वामे स्रोतसि दक्षिणे ।
भैरवेषु तथाऽन्येषु पशुपाशुपतादिषु ॥ ६६ ॥

सप्तर्षयः ग्रहेश्वरो चन्द्रादित्यौ च शिवतत्त्वमेव । इन्द्रः कुबेरः वरुणः— ॥ ६२ ॥

—यमः, अग्निः, आदिशेषः, निर्ऋतिः, वायुः इत्येते सर्वेऽपि शिवतत्त्वमेव । ईशानः सर्वे गणेशाः अष्टौ वसवः— ॥ ६३ ॥

—तथैव एकादश रुद्राः देवदानवश्रेष्ठाश्च अष्टविधं दैवं पञ्चविधं धैर्यम्— ॥ ६४ ॥

—मनुष्यवर्गः समस्तं जगच्च शिवतत्त्वमेव । चत्वारो वेदाः उपनिषद्द्वारा यत् प्रतिपादयन्ति तच्च— ॥ ६५ ॥

—सिद्धान्तग्रन्थेषु भूततन्त्रेषु वाममार्गे दक्षिणमार्गे च भैरवतन्त्रेषु पशुपाशुपतादिग्रन्थेषु— ॥ ६६ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विष्णुतन्त्रे च बौद्धे च तथा दिक्पतिदर्शने ।
अष्टादशपुराणेषु षडङ्गेषु परेषु च ॥ ६७॥

योगशास्त्रेषु सर्वेषु न्यायवैशेषिकादिषु ।
यैर्यैर्यद्यत्परिक्रम्य तत्सर्वं प्रोच्यते बुधैः ॥ ६८ ॥

तत्तत्स एव देवेशः शिवशास्त्रे सनातनः ।
आदिमध्यान्तनिर्मुक्तस्वभावविमलप्रभुः ॥ ६९ ॥

सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे ।
केवलाद्यनवच्छिन्नो [1] वामेनोदितगोचरः ॥
[वाङ्मनोऽतीतगोचरः] ॥ ७० ॥

—विष्णुतन्त्रेषु बौद्धग्रन्थेषु दिक्पतिदर्शनग्रन्थेषु अष्टादशपुराणग्रन्थेषु शिक्षादिवेदषडङ्गग्रन्थेषु इतरग्रन्थेषु च— ॥ ६७ ॥

—योगशास्त्रग्रन्थेषु सर्वेषु न्यायवैशेषिकादिग्रन्थेषु यैर्यैर्बुधैः पुनःपुनरालोड्य यद्यत् प्रोच्यते— ॥ ६८ ॥

—तत्सर्वं शिवशास्त्रेषु प्रोक्तं सनातनं शिवतत्त्वमेव प्रोक्तम् । शिवागमे प्रतिपाद्यमानः असौ शिवः आदिमध्यान्तशून्यः स्वतःशुद्धः स्वयंप्रभुः ॥ ६९ ॥

—सर्वज्ञः परिपूर्णश्च वर्तते । अपि च सः केवलाद्यनवच्छिन्नः वाङ्मनसयोः अगोचरः सन् अनुभवैकवेद्यः ॥ ७० ॥

---

1. देशकालानवच्छिन्नो—ग.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निष्कलोऽ[सकलो]निष्कलश्चापि सर्वगन्धर्ववित् सदा ।
[सर्वगः सर्ववित् सदा ।]

[तादृशशिवसाक्षात्कारयोग्यतावर्णनम्]

अन्तर्यागो हि तत्पूजा योगिनामेव सा भवेत् ॥ ७१ ॥

योगाभ्यासरतैः सद्भिः हृत्कुशेशयमध्यमे ।
यमाद्यष्टाङ्गयोगेन विमलीकृतमानसे ॥ ७२ ॥

पूज्यते नेतरैस्तस्य पूजां कर्तुं विशिष्यते ।
हित्वा तदर्चनां नान्यत्[1] शक्यो भवति देहिनाम् ॥ ७३ ॥

अन्तर्यागाधिकारोऽत्र क्वचित् कस्यापि जायते ।
बहिर्यागाधिकारोऽयं किञ्चिद्ज्ञानेन[2] जायते ॥ ७४ ॥

निष्कलः सकलनिष्कलः सकलश्च सर्वव्यापकः सर्वज्ञश्च भवति । तस्य शिवस्य पूजा अन्तर्यागरूपा । सा च योगिनामेव भवति ॥ ७१ ॥

योगाभ्यासनिरतैः सद्भिः यमनियमाद्यष्टाङ्गयोगेन निर्मलीकृतमानसे हृदयकमलमध्ये सः पूज्यते ॥ ७२ ॥

अन्तर्यागरूपेयं पूजा यमनियमाद्यष्टाङ्गयोगरहितैरितरैः कर्तुं न शक्यते । इमां अन्तर्यागरूपां पूजां विहाय देहिनां अन्यत् श्रेयस्साधनं नास्ति ॥ ७३ ॥

अन्तर्यागाख्यपूजाधिकारश्च क्वचित् कस्यापि जायते । न सर्वत्र सर्वेषाम् । बहिर्यागाख्यपूजाधिकारः तदुपयोगितत्त्वज्ञानेन भवति ॥ ७४ ॥

---

1. तदर्चनादन्यत्–ग. ङ.
2. ज्ञानं च–ग. ङ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[तस्यैव सर्वदेवतामूलसदाशिवस्वरूपत्वम्]

इत्यवेत्य स देवेशः शिवः सर्वान्तरस्थितः ।
लोकानुग्राहको भूत्वा जन्तूनां भुक्तिमुक्तिदः ॥ ७५ ॥
पञ्चब्रह्मतनुः साक्षात् स शिवोऽभूत् सदाशिवः ।

[तस्मात् महेश्वर-जगद्गुरुब्रह्मणामुत्पत्तिः]

तस्मादीश्वर उत्पन्नः सर्वदेवादिरव्ययः ॥ ७६ ॥
ततो हि मत्तः सर्वज्ञः समुत्पन्नो जगद्गुरुः ।
तन्नाभिकमलोद्भूतो ह्यजो लोकपितामहः ॥ ७७ ॥

[तस्यैव मायाश्रयत्वम्]

अधिश्रिता भवेद्विद्या सैव मायेति कीर्तिता ।
मूलप्रकृतिरित्येषा साऽपि पञ्चसु शुक्तिषु[शक्तिषु] ॥ ७८ ॥
कार्यकारणभावेन स्थितः[ता] तस्य[स्याः] स्थितिं शृणु ।
तस्याः[तासां] मनोन्मनी देवी सदाशिवसमाश्रिता ॥ ७९ ॥

—इति ज्ञात्वा सर्वान्तर्यामी देवेशः सः परशिवः लोकानुजिघृक्षया सर्वप्राणिनां भुक्तिमुक्तिप्रदानाय— ॥ ७५ ॥

—पञ्चब्रह्मतनुः साक्षात् सदाशिवो भवति । सदाशिवात् सर्वेषां देवानां आदिभूतः अव्ययः महेश्वरः समुत्पन्नः ॥ ७६ ॥

तस्मात् मद्रूपात् महेश्वरात् सर्वज्ञः जगद्गुरुः समुत्पन्नः । विष्णोः नाभिकमलात् लोकपितामहो ब्रह्मा सञ्जातः ॥ ७७ ॥

विद्या शिवतत्त्वमधिश्रिता भवति, सा विद्यैव मायेति कीर्त्यते । इयं मायैव मूलप्रकृतिरित्युच्यते । एषा मूलप्रकृतिः पञ्चसु शक्तिषु— ॥ ७८ ॥

—कार्यकारणभावेन स्थिता । तस्याः विद्यारूपमूलप्रकृतेः स्थितिं कथयामि शृणु । तासां शक्तीनां मनोन्मन्याख्या शक्तिः सदाशिवं समाश्रिता भवति ॥ ७९ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[मन्त्रवाहननिरूपणम्]

मन्त्रवासो मया प्रोक्तः मन्त्रवाहनमुच्यते ।
लिङ्गे च प्रतिमाकुम्भे वास्तौ वह्नौ च मूलके ॥ ८० ॥
अन्ये[न्य]कुम्भे च वास्ये च युक्तं मन्त्रस्य वाहनम् ।

[मन्त्रलक्षणप्रकरणनिगमनम्]

एवं नवदश प्रोक्तं मन्त्रजातस्य लक्षणम् ॥ ८१ ॥
मन्त्रजातमिदं प्रोक्तम् । मन्त्रकीलमथ शृणु ॥ ८२ ॥

इति श्रीवातुलतन्त्रे शुद्धाख्ये सहस्रग्रन्थ-
संहितायां मन्त्रजातं नाम
नवमः पटलः

—०—

एवंप्रकारेण मन्त्रवासः उक्तः । अथ मन्त्रवाहनं निरूप्यते । लिङ्गं, प्रतिमा, कुम्भः, वास्तु, अग्निः, मूलस्थानम्— ॥ ८० ॥

—दीक्षाप्रोक्षणकालस्थापितकलशः, वासयोग्यं वस्तु, इत्येतत् सर्वं मन्त्रयोग्यं वाहनं भवति ।

एवं मन्त्रजातस्य एकोनविंशतिस्वरूपाणि कथितानि ॥ ८१ ॥

हे षण्मुख! एवं मन्त्रजातं निरूपितम् । इतः परं मन्त्रकीलं शृणु ॥ ८२ ॥

इति श्रीवातुलशुद्धाख्यतन्त्रसहस्रग्रन्थ-
संहिताव्याख्यायां मन्त्रजातं नाम
नवमः पटलः

—०—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ मन्त्रकीलपटलः
दशमः

[पटलार्थसूचनपूर्वकं मङ्गलाचरणम्]

सकलभुवनभूतभावनाभ्यां
जननविनाशविहीनविग्रहाभ्याम् ।
नरवरयुवतीवपुर्धराभ्यां
सततमहं प्रणतोऽस्मि शङ्कराभ्याम्[1] ॥ १ ॥

[2]ज्ञात्वा त्रिंशदतीत[3]मेकमधिकं[4] शैवं महातत्त्वकं
तद्भेदं[5] बहुलीलया[6] च सहितं नानावतारान्वितम् ।

[कीलाकीलेषु मन्त्रेषु कीलान् उत्सृज्य मन्त्रवित् ।
नेत्रादिदेहपर्यन्तं अकीलात्मकमन्त्रकान् ॥ १ ॥
भुक्तिमुक्त्यादिसर्वार्थदायकान् सम्यगुच्चरन् ।
सामान्यादिषु शैवेषु वीरशैवे सुदीक्षितः ॥ २ ॥
लिङ्गप्राणाविनाभावात् अश्नुते यत् सुखं महत् ।
आविर्भवतु सर्वेषां भक्तानां तदहर्निशम् ॥ ३ ॥]

समस्तभुवनेषु विद्यमानानां सर्वेषां प्राणिनां रक्षकाभ्याम्, उत्पत्तिविनाशरहितशरीराभ्याम्, नरश्रेष्ठस्य श्रेष्ठयौवनयुक्तायाः नार्याश्च शरीरं धारयद्भ्याम्, पार्वतीपरमेश्वराभ्यां अहं सर्वदा प्रह्वीभूतोऽस्मि ॥ १ ॥

---

1. इदं मङ्गलपद्यं–ग. च. पुस्तकयोरेव दृश्यते ।
2. पद्यमिदं–घ. छ. ट. ठ. ढ. त. थ. द. ध प. पुस्तकेष्वेव दृश्यते । ख. ज. झ. पुस्तकेषु इदं मङ्गलपद्यमेव न दृश्यते ।
3. दधिक–क. घ. छ. ट. त. थ. द. प.
4. ममितं–क. घ. छ. ट. ठ. ढ. त. थ. द. ध. प.
5. तस्येदं–ट. ढ. ध.
6. ब्रह्मलीलया–प.
   बहुकीलया–ट. ढ. थ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सामान्यादिसमस्तशैवकुशलं[1] वीराख्यशैवं[2] महत्
संश्रित्यात्मनि दिव्यलिङ्गमनिशं ध्याये तदीले [डे]भजे[3] ॥२॥

[पटलारम्भप्रतिज्ञा, ग्राह्य-त्याज्यमन्त्रविभागश्च]

अथातः सम्प्रवक्ष्यामि मन्त्रकीलमथ[4] शृणु ।
अकीलं[5] कीलमित्युक्तं कीलमन्त्रं[6] विसर्जयेत् ॥ ३ ॥

दिव्यलिङ्गं शिवाद्येकत्रिंशत्स्वरूपात्मकम्, शिवसम्बन्धिमहातत्त्वात्मकम्, नानालीलास्वरूपम्, चन्द्रशेखराद्यनेकावतारसहितम्, सामान्यादिसमस्तशैवानामपि क्षेमङ्करम्, श्रेष्ठवीरशैवस्वरूपं चेति ज्ञात्वा, तत् स्वात्मनि धृत्वा, अहं अनारतं मनसा चिन्तयामि, वचसा स्तौमि, वपुषा सेवे च ॥ २ ॥

अथातः मन्त्रजातनिरूपणानन्तरम्, मन्त्रकीलं संप्रवक्ष्यामि निरूपयामि । अथ शृणु अवधारय । अकीलं कीलमिति मन्त्रजातं द्विधा उक्तम् प्रोक्तम् । कीलमन्त्रं तयोः कीलमन्त्रं विसर्जयेत् परित्यजेत् ॥ ३ ॥

---

1. शैवनिवहं–ग.
2. वीरं च शैवं–ग.
3. ध्यायन् तदीशं भजे–ग.
4. मतः–त. ध.
5. अखिलं–थ.
   अकिलं–घ. छ. ट. त.
   कीळकं–द.
   आकारं–ग. च.
6. कीलमन्त्रे–ध.
   खिलमन्त्रं–थ.
   कीलं मन्त्रं–ठ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[मन्त्रोच्चारणविधिः]

[1]नेत्रे ललाटवक्षश्च[2] श्रोत्रे[3] चास्यं च नासिका[4] ।
पादौ[5] बाहू च देहश्च[6] मन्त्र[7] उच्चार्यते बुधैः ॥ ४ ॥

[मन्त्राणां अनुकूल-प्रतिकूलस्वरूपे]

अति[8] दीर्घायते वृत्तं अथ दीर्घाक्षवृत्य च[9] ।
अर्धचन्द्रसमाकारं नादं[द] आयान्त[10]नादवत् ॥ ५ ॥

अयं नेत्रमन्त्रः, अयं ललाटमन्त्रः, अयं वक्षोमन्त्रः, अयं श्रोत्रमन्त्रः, अयमास्यमन्त्रः, अयं नासिकामन्त्रः, अयं पादमन्त्रः, अयं हस्तमन्त्रः, अयं देहमन्त्रः इति विदित्वा मन्त्रज्ञैः मन्त्रः उच्चार्यते ॥ ४ ॥

मन्त्रवृत्तं सर्वदा क्रमशो दीर्घदीर्घं भवति । अयं मन्त्रदीर्घायः मन्त्रनेत्रमावृत्य अर्धचन्द्रसमाकारो भवति । अयं च ध्वनिरिवागच्छन् मन्त्रनादः साक्षात् नादस्वरूपो भवति ॥ ५ ॥

---

1. पद्यमिदं–छ. पुस्तके न दृश्यते ।
2. ललाटे चक्षुश्च–ग. च.
3. श्रोत्रं–ग. च.
4. चास्यं च नासिके–झ. ध.
   नासिकमास्यकम्–ग. च.
5. कण्ठं–ग. च.
6. देहेच–ग. च.
7. मन्त्रं–क. ग. घ. च. छ. ज. झ. ट. ठ. ढ. त. थ. द. ध. प.
8. अथ–क. ख. घ. ट. ढ. त. थ. द. ध. प.
9. दीर्घांश्च वृत्तकम्–ग. च.
   दीर्घांद्यवृत्तकम्–ख.
   दीर्घं च वृत्तकम्–थ.
   दीर्घाक्षवृत्त च–घ. छ. ट.
   अत्र "दीर्घाक्षवृत्य चे"ति छन्दोनुरोधेन ।
10. आयान्ति–ख. झ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[1] एवमादिः[दि] तु[2] मन्त्राणां सर्वदुःखविनाशनम्[3] ।
भुक्तिमुक्तिप्रदं चैव सर्वकामार्थसाधनम् ।। ६ ।।
विपरीतो विपत्त्यै स्यात् मन्त्ररूपं प्रकीर्तितम्[4] ।

[भक्तिस्थानानि]

गुरौ लिङ्गेऽक्षमालायां मन्त्रे भस्मनि पञ्चसु ।। ७ ।।
एतासु शिवमुद्रासु शिववद्भक्तिमाचरेत्[5] ।

[शिवे आत्मात्मीयसमर्पणविधिः]

आत्मीयान् विविधान् भोगान् स्त्रीपुत्रप्रमुखानपि ।। ८ ।।

पूर्वोक्तरीत्या प्रतिपादितं मन्त्रस्वरूपं समस्तदुःखमोचनं भुक्तिमुक्तिप्रदायकं समस्तकामितार्थसाधनं च भवति ।। ६ ।।

एतद्विपरीताकारः मन्त्रः विनाशकृद्भवति । एवं मन्त्ररूपं निरूपितम् । इदानीं शिवभक्तिस्थानं निरूप्यते— शिवोपासको भक्तः गुरौ शिवलिङ्गे अक्षमालायां शिवमन्त्रे भस्मनि— ।। ७ ।।

—इत्येतासु पञ्चसु शिवमुद्रासु शिवे इव भक्तिमाचरेत् । स्वकीयान् समस्तानपि भोग्यपदार्थान् पत्नीपुत्रादीनपि— ।। ८ ।।

---

1. 'एवमादि तु' इत्यारभ्य 'स्यान्मन्त्ररूपं प्रकीर्तितम्' इत्यन्तो भागः–क. ख. घ. छ. ट. ठ. ढ. त. थ. द. ध. प. पुस्तकेषु न दृश्यते ।
2. एवमाकार–झ.
3. विनाशकृत्–थ.
   विमोचनम्–झ.
4. एतावत्पर्यन्तमेव–ज. पुस्तकपाठः ।
   ज. पुस्तके—अत्रैव च दशमपटलसमाप्तिरपि प्रदर्शिता ।
5. शिवभक्तिं समाचरेत्–ग. च. झ
   शिवसद्भक्तिमाचरेत्–प.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वात्मानं चित्तबुद्धी च[1] तेषां च वशमानयेत् ।

[शिवद्रोहलक्षणम्]

यो भेदं भक्तिमान्[2] भक्तः[3] तेषु मोहात् करोति च[4] ॥ ९ ॥
शिवद्रोही स[5] विज्ञेयः सर्वकर्मबहिष्कृतः ।

[शैवभेदाः]

शैवं चतुर्विधं ज्ञेयं समासात् शृणु षण्मुख ॥ १० ॥
सामान्यं मिश्रकं चैव शुद्धं[6] वीरं[7] यथाक्रमम् ।

[तत्र प्रथम-सामान्यशैवलक्षणम्]

तत्रादौ सम्प्रवक्ष्यामि शैवसामान्यलक्षणम् ॥ ११ ॥

—स्वात्मानं, चित्तं, बुद्धिं च गुर्वादीनां अधीनतां नयेत् । अहं महाशिवभक्तोऽस्मीत्यभिमन्यमानो यः शिवभक्तः पूर्वोक्तगुरुशिवलिङ्गाक्षमाला-शिवमन्त्रभस्मसु अज्ञानात् भेदभावनां करोति— ॥ ९ ॥

—सः शिवद्रोहीति ज्ञातव्यः । सः सर्वशिवकार्यबहिष्कृतश्च भवति ॥

इदानीं शैवभेदो निरूप्यते—हे षण्मुख! इदं च शैवं चतुर्विधं भवति । तत् शैवस्वरूपं सङ्ग्रहेण शृणु ॥ १० ॥

शैवं—सामान्यशैवं मिश्रशैवं शुद्धशैवं वीरशैवं चेति चतुर्विधं भवति । तेषु क्रमेण प्रथमं सामान्यशैवलक्षणं वक्ष्यामि ॥ ११ ॥

---

1. स्वात्मानं च विशेषेण–क. ख. घ. छ. ट. ठ. ढ. त. थ. द. प.
   चित्तबुद्धी विशेषेण–ख.
2. शक्तिमान्–ग. च.
3. भक्ताः–ग. च.
4. मोहात्–प्रकुर्वते–क. घ. छ. झ. ट. ठ. ढ. त. थ. द. ध. प.
   मोहात् करोति सः–ग. च.
5. शिवद्रोहीति–ख. ग. घ. झ.
6. शुद्धः–थ.
7. वीरः–क. ट.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवलिङ्गं यदा[1] पश्येत् तदा[2] कुर्यात्[3] समर्चनम् ।
प्रदक्षिणं प्रणामं वा दर्शनं[4] वाऽत्र[5] कारयेत् ॥ १२ ॥

भस्मधारणमात्रेण[6] शुद्धो भवति सर्वदा ।
शिवकीर्तौ[7] तदालापे[8] प्रीतिमान् शिवभक्तके ॥ १३ ॥

यः स्वयम्भुलिङ्गं देवदानवमानवादिप्रतिष्ठितलिङ्गं वा यदा पश्यति स तदा तस्य शिवलिङ्गस्य पूजां कुर्यात् । तदशक्तौ प्रदक्षिणं, तदशक्तौ प्रणतिं, तदशक्तौ तद्दर्शनं वा कुर्यात् ॥ १२ ॥

सामान्यशैवः शिवार्चनादिकार्येष्वपि मन्त्रोच्चारणपूर्वकं विभूतिधारण-मात्रेण सर्वदा शुद्धात्मा भवति । सः शिवकीर्तने शिवालापे शिवभक्तेष्वपि प्रीतियुतो भवेत् ॥ १३ ॥

---

1. यथा–ग. च. झ.
2. तथा–ग. च. झ.
   सदा–त.
3. कुर्याः–ट.
4. प्रदक्षिणं च प्रणतिदर्शनं–ध.
   प्रदक्षिणं वा प्रणतिं दर्शनं–क. ख. छ. ट. त. थ. प.
   प्रदक्षिणं वा प्रणतं दर्शनं–ठ. ढ. द.
   प्रदक्षिणं प्रणामं च दर्शनं–ग. च. झ.
5. च्चात्र–ग. च. झ.
6. मंत्रेण–ख. ग. च. झ. वर्जं अन्यत्र.
7. शिवकीर्ति–क. घ. छ. ट. ठ. ढ. त. थ. द. ध. प.
   शिवकीर्तिः–ग. च. झ.
8. तदालाभे–प.
   तथालापे–छ. थ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतेषां नियतिर्नास्ति यथालाभं[1] समाचरेत् ।

[द्वितीयमिश्रशैवलक्षणम्]

सामान्यलक्षणं प्रोक्तं वक्ष्ये मिश्रस्य लक्षणम् ।। १४ ।।
शैवं च वैष्णवं शाक्तं कौमारं गाणपत्यकम् ।
सौरं चाखिलदैवत्यं पूजनं च समाचरेत् ।। १५ ।।
एतेषूक्तेषु सर्वेषु[2] तत्तन्मन्त्रेषु मिश्रका[णा]त्[3] ।
समभक्ति[4]समायुक्तः[5] सर्वान् लिङ्गेन[6] भावयेत् ।। १६ ।।

पूर्वोक्तेषु शिवार्चनादिषु नियमो नास्ति । प्राप्त्यनुसारेण शिवार्चनादिकं कुर्यात् । इत्थं सामान्यशैवलक्षणं निरूपितम् ।

इतः परं मिश्रशैवलक्षणं निरूप्यते ।। १४ ।।

शैवपीठमध्यस्थापितशिवलिङ्गस्य तदावरणस्थविष्णुप्रतिमायाः तथैव तदावरणस्थशक्तिदेवतायाः, तथा तदावरणस्थषण्मुखस्य, तथैव तदावरणस्थविनायकस्य, तदावरणस्थादित्यस्य च पूजनं कुर्यात् । एवं शिवलिङ्गसमीपस्थविष्ण्वादिपञ्चदेवतापूजनं पञ्चपूजनमित्युच्यते । एतत्पञ्चदेवतापूजासाहित्येन ब्रह्मेन्द्राद्यखिलदेवतानां च पूजनं कुर्यात् ।। १५ ।।

अत्रोक्तविष्ण्वादिपञ्चदेवतासु अनुक्तब्रह्मेन्द्रादिसमस्तदेवतासु तत्तद्देवता-

---

1. यथालब्धं–क. ख. ग. घ. च. छ. झ. ट. ठ. ढ. त. थ. द. प.
2. शास्त्रेषु–ध.
3. मिश्रितान्–ग. च. झ.
मिश्रिकान्–थ.
मिश्रवान्–छ.
मिश्रकान्–प.
4. सम्यक् भक्ति–ग. च. झ.
5. समायुक्ताः–ध.
समायुक्तं–घ. थ.
6. सर्वालिङ्गेन–क.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[तृतीयशुद्धशैवलक्षणम्]

मिश्रशैवमिति[1] प्रोक्तं शुद्धशैवमथ[2] शृणु ।
शुद्धत्वं[3] शिवमुद्दिश्य[4] शिवाज्ञातं[5] हि शैवकम् ॥ १७ ॥
शुद्धशैवसमायोगात्[6] शुद्धशैव[7]मिति स्मृतम् ।

मन्त्रेषु च सर्ववर्णाधिदेवताकारणभूतशिवमन्त्राक्षरस्य **मिश्रणात्** शिवः सर्वदेवतामन्त्रस्थः परिपूर्णभावेन शिवलिङ्गे शिवलिङ्गार्चकविष्ण्वादिदेवतासु च समानभक्तियुक्तः सन् सर्वा देवताः शिवलिङ्गसहिता एव भावयेत् । ईदृशशिवभावनया सर्वदेवतापूजनमेव उत्तमं शिवपूजनम् । अन्यथा विष्ण्वादिपूजनं शिवपूजनं न भवति । शिवः सर्वदेवताऽन्तःस्थः इति क्रियमाणं विष्ण्वादिसर्वदेवतापूजनमेव मिश्रशैवं भवति ॥ १६ ॥

हे कुमार! एवं **मिश्रशैवं** निरूपितम् । इतः परं **शुद्धशैवं** निरूप्यते । अवधारय । इदानीं शुद्धशैवशब्दस्य निर्वचनमुच्यते—शिवमुद्दिश्य प्रवृत्तत्वात् शुद्धत्वं भवति । **शिवाज्ञातं शैवम्** ॥ १७ ॥

शुद्धस्य शैवस्य च सम्बन्धात् **शुद्धशैवमिति** निरुक्तं भवति ।

---

1. मिश्रं शैवमिदं–घ.
2. मतः–थ. घ.
3. शुद्धतत्त्वं–घ.
   शुद्धत्वात्–ग. च. झ.
4. शिवमुद्दिष्टात्–क. ख. घ. ट. ठ. त. थ. द.
   शिवमादिष्टात्–छ.
5. शिवाख्यातं–घ.
6. शैवशिवयोगात्–त.
7. शुद्धं शिव–ग. च. छ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवेनोत्पद्यते शैवः[1] तस्माज्जातः शिवद्विजः[2] ॥ १८ ॥
कामिकादिषु तन्त्रेषु चाष्टा[3]विंशतिषु क्रमात् ।
वेदशास्त्रादि[4]विद्यासु[5] कृताभ्यासः शिवव्रती[6] ॥ १९ ॥
कर्षणादिप्रतिष्ठान्तं प्रतिष्ठाद्युत्सवान्तकम् ।
उत्सवात्प्रा[7]यश्चित्तान्तं ज्ञात्वा सर्वं समाचरेत् ॥ २० ॥

शिवाज्जातः शैवः । तस्माज्जातः शिवद्विजो भवति ॥ १८ ॥

कामिकादिवातुलान्तेषु अष्टाविंशतिषु तन्त्रेषु ऋगादिवेद-मन्वादि-धर्मशास्त्र-पुराणेतिहासादिविद्यासु च क्रमात् कृताध्ययनः शिवोपासकः— ॥ १९ ॥

—शिवाकर्षणादारभ्य शिवलिङ्गस्थापन-कलशस्थापन-शक्तिदेवता-स्थापन-परिवारदेवतादिस्थापनक्रियाः शिवलिङ्गप्रतिष्ठामारभ्य नित्योत्सव-शिवोत्सवान्तक्रियाः उत्सवादारभ्य प्रायश्चित्तान्ताः क्रियाश्च यथावद्विज्ञाय सर्वं क्रियाकलापं कुर्यात् ॥ २० ॥

---

1. शैवं–क. घ. छ. ट. ठ. ढ. त. थ. द. ध. प.
2. इतः परं–क. ख. ग. घ. च. झ. ट. ठ. ढ. त. थ. द. ध. प. पुस्तकेषु एवं अधिकः भागः दृश्यते—"वीरागमे :—
   शिवद्विजास्तु विप्रेन्द्र ! ह्यादिशैवाः प्रकीर्तिताः ।
   कौशिकः काश्यपश्चैव भारद्वाजोऽत्रिरेव च ।
   गौतमश्चेति पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ।
   एषां ऋषीणां वंशेषु जातास्ते हि शिवद्विजाः ।
   पुनर्दीक्षां न चार्हन्ति कृता चेत् सा तु निष्फला ॥"
   इति ॥
3. अष्टा–क. ख. घ. छ. ट. ठ. ढ. त. थ. द. ध. प.
4. शास्त्रेषु–ट.
5. सर्वेषु–क. ख. घ. छ. झ. ट. ठ. त. थ. द. ध. प.
6. कृत्वाऽभ्यासं शिवं प्रति–ग. च. झ.
7. उत्सवादिप्रा–ग. च. झ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[तस्य आत्मार्थपरार्थेतिद्विविधलिङ्गपूजाविधिः]

मन्त्रयन्त्र[1]क्रियामुद्रा[2]न्यास[3]वाहनकादिभिः[4] ।
उपचारैः बहुविधैः लिङ्गं सिंहासने यजेत्[5] ॥ २१ ॥

प्रासादप्रणवादिमन्त्रैः, प्रासादपञ्चाक्षर्यादियन्त्रक्रियाभिः, अस्त्रमुखादिमुद्राभिः, बीजादिन्यासैः, आवाहनसंस्थापनादिक्रियाभिः, गन्धमाल्याद्युपचारैश्च शिवलिङ्गं सिंहपीठे पूजयेत् ॥ २१ ॥

---

1. प्रासादादीन्येव यन्त्र(चक्र)पर्यायनामानि भवन्ति । तद्यथा—प्रासादयन्त्रम्, पञ्चाक्षरीयन्त्रम्, शिवयन्त्रम्, अघोरास्त्रयन्त्रम्, पाशुपतास्त्रयन्त्रम्, इत्यादीनि ।

2. सुप्रभेदे—अस्त्रमुद्रा वक्त्रमुद्रा महामुद्रा ततः परा ।
शोधन्याख्या महामुद्रा तथा संहृतिसंज्ञका ।
मुद्रा पञ्चमुखी चैव तथा सुरभिमुद्रिका ।
द्रव्यमुद्रा मुकुलिका, पद्ममुद्रा तथैव च ।
शशकर्णा तथा मुद्रा शक्तिमुद्रा तथैव च ।
बीजमुद्रेति विख्याता दर्शनीया विशेषतः ।
शान्ता चावाहनी चैव ततो मुद्रा मनोरमा ।
ध्वजमुद्रेति विख्याता दर्शनीया विशेषतः ।
लिङ्गमुद्रा च गायत्री कलकण्ठी तथैव च ।
शूलमुद्रा नमस्कारा द्वविंशत्या प्रकीर्तिताः ॥

क्रियासारे—धेनुयोनिसरोजातविच्छोटाच्छादनाह्वयाः ।
उपसंहृतसंज्ञा चेत्येताः मुद्राः षडीरिताः ॥

3. बीजन्यासमन्त्रन्यासादयः ।

4. आवाहनं संस्थापनं संनिधानं संनिरोधश्चेति—आवाहनादीनि इति ।

5. एतदनन्तरम्–ग. पुस्तके—

क्रियासारे—प्रसादं प्रणवं हंसं व्योमव्यापि शिवाक्षरम् ।
अघोरं दक्षिणामूर्तिं मृत्युञ्जयमतः परम् ॥
श्रीरुद्रं च परमं च श्रीमत्पञ्चाक्षरं परम् ।
अघोरास्त्रं शिवास्त्रं च तथा पाशुपतास्त्रकम् ॥
द्वादशैते महामन्त्राः शिवमन्त्रोत्तमोत्तमाः ॥

एते द्वादशमहामन्त्राः, शिवागमोक्तशिवमन्त्राः, उमाशक्तिमन्त्राः, विघ्नेशादिलोकपालादिमन्त्राश्च इति विद्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आत्मार्थं च परार्थं च पूजा द्विविधमुच्यते ।
दत्ते च गुरुणा लिङ्गे स्थण्डिले स्वयमा[त्मस्य चा]त्मनि ॥२२॥
आत्मार्थमिद[1]माख्यातं परार्थं तु[2] ततः शृणु ।
ग्रामादौ स्थापिते लिङ्गे[3] यद्वा देवादिनिर्मिते ॥ २३ ॥
परार्थमिति विज्ञेयं[4] सर्वप्राणिहितावहम् ।
[5]शिवद्विजेन[6] कर्तव्या द्विधा पूजेति चोदिता ॥ २४ ॥

शुद्धशैवपूजा आत्मार्था परार्था चेति द्विप्रकारा भवति। आचार्येण प्रदत्ते शिवलिङ्गे स्थण्डिलोद्धृतशिवचक्रे शिवलिङ्गे वा स्वहृदये वा क्रियमाणा पूजा आत्मार्था ॥ २२ ॥

हे षण्मुख! आत्मार्थं पूजनमेवं निरूपितम् । इतः परं परार्थ-पूजनमवधारय । यतः कुतश्चित् कारणात् देवर्षिदानवमानवादिभिर्निर्माय ग्रामपुरसमुद्रतीरनदीतीरगिरिगुहान्तरादिषु प्रतिष्ठिते शिवलिङ्गे क्रियमाणं पूजनम्— ॥ २३ ॥

—परार्थपूजनमिति ज्ञातव्यम् । इदं च पूजनं सर्वेषां प्राणिन हितकरं भवति । एवं शिवद्विजेन क्रियमाणा द्विविधा शिवपूज स्वार्थपरार्थरूपेति निरूपिता भवति ॥ २४ ॥

---

1. मेव–ध.
2. परार्थस्य–थ.
   परार्थं च–ध.
3. लिङ्गं–छ.
4. हि ज्ञेयं–छ.
5. पद्यार्धमिदं–ठ. पुस्तके न दृश्यते ।
6. शुद्धशैवेन (आदिशैवेन) } ग. च.
   वीरशैवेन–झ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[अनेन शिवावरणादन्यत्र देवतान्तरपूजानिषेधः]

अन्येषां स्वार्थयजनं[1] न कुर्यात्तु[2] परार्थकम् ।
मोहाल्लोभाच्च[3] कुर्वीत राज्ञो राष्ट्रस्य दुःस्थितिः ॥ २५ ॥
शिवा[4]वरणदेवांश्च सर्वान्[5] सम्पूजयेत् गुह[6]! ।
पृथक् स्थान[7]स्थिताः सर्वाः[8] नार्चयेत् अन्यदेवताः[9] ॥ २६ ॥

शिवद्विजः ब्रह्मादीतरदेवानां शिवावरणेभ्योऽन्यत्र पृथक्स्थानेषु आत्मार्थं परार्थं च पूजां न कुर्यात् । यदि शिवाधिक्याज्ञानात् कुटुम्ब-भरणनिमित्तद्रव्यलोभाद्वा शिवावरणेभ्योऽन्यत्र ब्रह्मादीतरदेवतापूजां कुर्यात् तदा राज्ञः राष्ट्रस्य च अनिष्टं भवति ॥ २५ ॥

हे सुब्रह्मण्य! परार्थपूजायां निरतः शिवद्विजः शिवावरणगतान् ब्रह्मविष्ण्वादिसर्वदेवान् शिवपरिवारभावनया सम्यक् पूजयेत् । परं तु शिवावरणेभ्यो बहिः प्रतिष्ठितब्रह्मविष्ण्वादिदेवान् न पूजयेत् ॥ २६ ॥

---

1. स्वात्मार्थाय–प.
2. न च कुर्यात्–छ.
3. मोहलोभाच्च–क. झ. घ. प.
4. शैवा–ग. च. झ.
5. महान्–झ.
6. येत् क्रमात्–ग. च. झ.
7. पृथ्विस्थान–ग. च. झ.
   पृथक्स्थाने–त. प.
8. स्थितान् सर्वान्–क. घ. ट. त. थ. द. ध. प.
9. देवताम्–थ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मन्त्रपिण्डहृदम्भोजे वासमन्त्रस्य भावतः[1] ।
आवाहनात्[2] समायुक्ते[3] लिङ्गे[4] पूजादिकं[5] चरेत् ॥ २७ ॥
मन्त्रलिङ्गशरीरः स्यात्[6] स एव[7] परमः शिवः ।

[चतुर्थ-वीरशैवनिरूपणारम्भः]

शुद्धशैवमिदं[8] प्रोक्तं[9] वीरशैवमथ[10] शृणु ॥ २८ ॥

शिवमन्त्रपिण्डात्मके स्वहृत्कमले आवाहिते शिवलिङ्गे वर्णवासमारभ्य शिववासपर्यन्तमन्त्रोक्तवासमन्त्रभावनया मानसिकपूजां कुर्यात् ॥ २७ ॥

तादृशहृत्कमलावाहितः पूजितश्च शिवः मन्त्रलिङ्गात्मकशरीरो भवति । स एव परमः शिवः ।

एवं शुद्धशैवस्वरूपं निरूपितम् । हे षण्मुख ! इतः परं वीरशैवस्वरूपं अवधारय ॥ २८ ॥

---

1. वासमन्त्रस्वभावतः–ध.
   वासमन्त्रस्य भावनाः–ग. च.
2. अवाह्येन–प.
3. समायोगे–ग. च. झ.
4. लिङ्गं–घ. ट. त.
5. पूजाधिक्यं-क.
   पूजाधिकं–प.
6. शरीरस्य–ग. च. झ.
   शरीरी स्यात्–ट. त.
7. स्वयमेव परः शिवः-छ.
8. मिति–क. ख. घ. छ. ट. ठ. ढ. त. थ. द. प.
9. प्रोक्तः–थ.
10. मतः–ध.
    ततः–क. ख. घ. ट. ठ. ढ. त. द.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[1]ज्ञानगम्यं रहस्यं च कैवल्यपदकारणम् ।
वीरशैवमिति ज्ञेयं एतल्लक्षण[2]मुच्यते ॥ २९ ॥

वीरशैवं अनुभवैकवेद्यं गोपनीयं कैवल्यपदप्रापकं चेति विज्ञेयम् । इदानीं वीरशैवस्वरूपं निरूप्यते ॥ २९ ॥

---

1. 'ज्ञानगम्यं' इत्यतः प्राक्—ग. च. झ. पुस्तकेषु—

"सर्वेषामपि शैवानां वीरशैवं महत्तरम् ।
सुलभं देवपूजायां सुलभं च क्रियास्वपि ॥"

इति श्लोको दृश्यते ।

अत्रैव वीरागमे—

"सर्वेषामपि शैवानां वीरशैवं महोत्तमम् ।
सुलभा देवि ! पूजा च सुलभं च क्रियावहम् ॥
अल्पक्रियं बहुफलं वीरशैवं महेश्वरि !
अन्यशैवं तु तत्सर्वं फलमल्पं क्रिया बहु ॥
तस्मात् सर्वप्रयत्नेन वीरमाहेश्वरं शुभम् ॥"

इति कर्नाटकभाषाव्याख्यायां उद्धृतः पाठो दृश्यते ।

अत्रैव—ख. पुस्तके तु टिप्पण्यां—

"सर्वेषामपि शैवानां वीरशैवं महोत्तमम् ।
सुलभा देवपूजा च सुलभं च क्रियावहम् ॥"

इति दृश्यते ।

2. तेषां लक्षण—ग. च. झ.
यत्तल्लक्षण—क. घ. छ. ट. ढ. त.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[वीरशैवपदार्थः]

एक एवायमेतस्मिन्[1] सर्वस्मिन् जगतीति यः[2] ।
विशिष्ट ईर्यते[3] यस्मात् वीर इत्यभिधीयते ॥ ३० ॥
शिवेन सह सम्बन्धं[न्धः] शैवमित्यादृतं[तो] बुधैः[4] ।
[5]उभयोः सम्पुटीभावात् वीरशैवमिति स्मृतम् ॥ ३१ ॥
शिवार्थार्पितजीवत्वात् वीरतन्त्रसमुद्भवात्[6] ।
वीरशैवसमायोगात् वीरशैवमिति स्मृतम् ॥ ३२ ॥

एतस्मिन् सर्वस्मिन् जगति यस्मात् कारणात् एक एवायमिति विशिष्टगुणवान् उच्यते तस्मादयं वीरः इत्यभिधीयते ॥ ३० ॥

विज्ञाः शिवेन सह सम्बन्धः शैवमिति कथयन्ति । वीर-शैवशब्दयोः सम्बन्धात् वीरशैवमिति स्मर्यते ॥ ३१ ॥

पुनरपि वीरशैवत्वं सहेतुकमुपपाद्यते—शिवैकसमर्पितजीवत्वात् वीरागमदीक्षाविर्भूतत्वात् वीरशैवशब्दसम्बन्धाच्च वीरशैवमित्युच्यते ॥३२॥

---

1. एवमेकायने यस्मात्–ग. च. झ.
   एकमेवायते तस्मिन्–प.
   एवमेकायते यस्मात्–झ.
2. जगदीश्वरः–ग. च. झ.
3. विशिष्टं वीयते–ग. च. झ.
4. चैवमादृत्य तं बुधैः–ग. च. झ.
   यश्चैवमित्यादृतं बुधैः–ढ. त. द.
   यश्शैवमित्यादृतं बुधैः–थ.
   यच्छैवमित्यादृतं बुधैः–क. छ. ट. ठ. प.
5. इत आरभ्य "वीरतन्त्रसमुद्भवात्" इत्यन्तो भागः–ग. च. पुस्तकयोः न दृश्यते ।
6. शिवान्वितं जीवयित्वा वीरतन्त्रसमुद्भवाः–झ.
   शिवार्थार्पितवीरत्वात् वीरतन्त्रसमुद्भवात्–ढ. ध.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[वीरशैवस्य त्रिधा विभागः]

वीरमाहेश्वरं तन्त्रं[तत्त्वं] ज्ञातव्यं त्रिविधं[1] सुत[2]!
सामान्यं च विशेषं च निराभारं[3] क्रमात् भवेत् ॥ ३३ ॥

[तत्र सामान्यवीरशैवलक्षणम्]

तत्रादौ[4] सम्प्रवक्ष्यामि वीरसामान्यलक्षणम् ।
हस्तमस्तकसंयोगात् भूतिपट्टस्य धारणात् ॥ ३४ ॥
[5] शिवदेहीति विज्ञेयः[6] सर्वपापैः प्रमुच्यते[7] ।
गुरुणा दत्तलिङ्गं[8] तु शिवमन्त्रेण धारयेत् ॥ ३५ ॥

हे षण्मुख! वीरमाहेश्वरतत्त्वं सामान्यवीरशैवं विशेषवीरशैवं निराभारवीरशैवमिति क्रमात् त्रिप्रकारं भवति ॥ ३३ ॥

तेषु प्रकारेषु प्रथमं सामान्यवीरशैवलक्षणं निरूप्यते—वीरमाहेश्वराभिधशिष्यस्य मस्तके वीरशैवाचार्यगुरुणा अनुग्रहपूर्वकं स्वहस्तप्रक्षेपात् "त्वं वीरशैवसाम्राज्यं परिपालय" इत्युक्तिपूर्वकं शिष्यस्य ललाटे गुरुणा भस्मधारणाच्च— ॥ ३४ ॥

—स शिष्यः शिवलिङ्गदेहीति ज्ञातव्यः । गुरुकरसञ्जातः वीरमाहेश्वरः सशिष्यः सर्वस्मादपि पापात् विमुक्तो भवति । सशिष्यश्च गुरुणा प्रदत्तं शिवलिङ्गं श्रीमत्पञ्चाक्षरीत्यभिधमन्त्रेण स्वदेहे धारयेत् ॥३५॥

---

1. विविधं-ग. च. झ.
2. स्मृतः-ठ.
   स्मृतम्-क. ग. च. झ.
3. निराधारं-झ. ध.
4. तन्त्रादौ-प.
5. पद्यार्धमिदं-ठ. पुस्तके न दृश्यते ।
6. विज्ञेयं-क.
7. समुच्यते-छ.
8. दत्तलिङ्गे-छ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[तस्य लिङ्गधारणस्थानानि]

मूर्ध्नि कण्ठे भुजे हस्ते हृत्स्थले नाभिमण्डले ।
एतेषामेकदेशे[1] तु धारयेत् शिवलिङ्गकम् ॥ ३६ ॥

[तस्य निष्ठाविशेषः]

एककालं द्विकालं वा[2] त्रिकालं वा समर्चयेत्[3] ।
गुरौ लिङ्गे सदा भक्तिं कारयेत् भसितव्रती[4] ॥ ३७ ॥

[विशेषवीरशैवलक्षणम्]

वीरसामान्यमाख्यातं विशेषं च ततः शृणु[5] ।
शिवकुम्भं समासाद्य स्थण्डिलादिषु[6] पूर्ववत् ॥ ३८ ॥

इदानीं शिवलिङ्गधारणस्थानानि निरूप्यन्ते—मस्तकः **कण्ठः भुजः हस्तः** हृदयं नाभ्यूर्ध्वप्रदेशः इत्येतेष्वन्यतमे स्थाने **शिवलिङ्गं धारयेत्** ॥ ३६ ॥

भस्मधारणव्रतनिष्ठः शिष्यः प्रातःकाले, प्रातःकालसायङ्कालद्वयेऽपि वा, प्रातर्मध्याह्नसायाह्नकालत्रितयेऽपि वा शिवलिङ्गं पूजयेत् ।

तथैव **गुरौ** शिवलिङ्गे च अनिशं **भक्तिं** कुर्यात् ॥ ३७ ॥

हे षण्मुख! **सामान्यवीरशैववर्तनमेवं** निरूपितम् । इतः परं **विशेषवीरशैवमवधारय** । वीरशैवदीक्षाकृत् देशिकोत्तमः शुद्धशैवदीक्षा-विधानोक्तरीत्या **स्थण्डिलादि**शुद्धप्रदेशेषु स्थापितं **शिवकलशमुपेत्य**—॥ ३८ ॥

---

1. मेकदेशं–क. घ. छ. ट. ठ. त. थ.
2. च–ग. च. झ.
3. समाचरेत्–ध.
4. भसिते व्रती–क. ख. घ. त. थ. द. प.
5. विशेषं शृणु षण्मुख!–ग. च. झ.
6. स्थण्डिलादीनि–प.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शिवकुम्भे[1] शिवं पूज्य[2] भक्तानन्नेन[3] तोषयेत् ।
शेषं दीक्षोक्तवत् कृत्वा मलपाशादिमोचनम्[4] ॥ ३९ ॥
गुरुः शिष्यं समालोक्य तत्त्वदेहं विचिन्तयेत् ।
शिवकुम्भस्थतोयेन[5] अ[त्व]भिषिञ्चेच्छिवाणुना ॥ ४० ॥
नादं बिन्दुं कलां चैव[6] तत्तत्स्थानेषु विन्यसेत् ।
षट्चक्रं च षडङ्गं च षडध्वानं षडानन! ॥ ४१ ॥

—शिवकलशे शिवं प्रपूज्य, ततः दीक्षोत्सवभागिनः चरलिङ्गभक्तान् सादरं अन्नेन सन्तर्पयेत् । पुनः अवशिष्टं दीक्षोत्सवकर्मजातं सर्वं समस्तमलपाशादिविमोचनं च वीरशैवदीक्षापटलेपूक्तरीत्या विधाय— ॥ ३९ ॥

—शिष्यं कृपयाऽवलोक्य 'अस्य शिवतत्त्वदेहः सम्पद्यताम्' इति विचिन्तयेत् । ततः शिवकुम्भस्थपवित्रतोयमादाय श्रीमत्पञ्चाक्षरीमन्त्रोच्चारणपूर्वकं शिष्यस्योत्तमाङ्गे दूर्वाङ्कुरेण प्रोक्षणं कुर्यात् ॥ ४० ॥

नादाख्यशिवं बिन्द्वाख्यशक्तिं कलाख्यशिवावयवांश्च ध्यायन्, स्थानादिक्रियाचरणपूर्वकं पीठस्थापितशिवलिङ्गस्थलस्य शलाकापीठिकावयवभूततत्तत्स्थानेषु विन्यसेत् । हे षण्मुख! मूलाधारादिषट्चक्राणि, शिवाङ्गादिषडङ्गानि, भुवनाध्वादिषडध्वनश्च— ॥ ४१ ॥

---

1. शिवकुम्भं–ध.
2. पूज्यं–क.
3. नन्येन–घ. छ. त. द. ध. प.
4. पाशाविमोचनम्–ध.
5. कुम्भसुतोयेन–प.
6. नादबिन्दुकलादीनि–ग. च. झ.
   नादबिन्दुकला नीत्वा–ख. छ. ट. ठ. ढ.
   नादबिन्दुकलान्वितम्–क. घ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्तत्स्थानेषु विन्यस्य पञ्च ब्रह्म न्यसेत्ततः ।
मूलमन्त्रं तूपदिशेत्[1] ततो लिङ्गं प्रदापयेत् ॥ ४२ ॥
शेषाणि सर्वकर्माणि दीक्षाऽध्वोक्तक्रमाचरेत्[2] ।
देहप्राणं[3] समायोज्य प्राण[4]लिङ्गे[5] प्रकल्पयेत् ॥ ४३ ॥
अविनाभावसंयोगात् तस्मादैक्यं प्रकल्पयेत् ।
अन्यदृष्टिनिपातं यत् तद् द्रव्यं[6] परिवर्जयेत् ॥ ४४ ॥

—पूर्वोक्तशिवलिङ्गावयवेषु विन्यस्य, ततः सद्योजातादिपञ्चब्रह्ममन्त्रान् न्यसेत् । शिव-सदाशिव-महेश्वरतत्त्वेषु शिवतत्त्वस्य प्राथम्यात् मूलतत्त्वात्मकतदीयशिवनाम्न एव चतुर्थ्यन्तस्य नमोऽन्तस्य च "शिवाय नमः" इति मूलमन्त्रत्वात् तस्यैव पञ्चाक्षरमन्त्रतया तन्मन्त्रस्यैव वीरशैवोपदेशार्हत्वम् । तन्मन्त्रोपदेशानन्तरं शिष्याय प्राणलिङ्गं प्रदद्यात् ॥ ४२ ॥

अवशिष्टसर्वकर्माणि वीरशैवदीक्षामार्गोक्तरीत्या समाचरेत् । वीरशैवदीक्षावान् वीरमाहेश्वरः देहप्राणम् अविनाभावेन संयोज्य प्राणलिङ्गे भावयेत् ॥ ४३ ॥

तस्मात् कारणात् प्राणलिङ्गैक्यं अविनाभावेन विभावयेत् । परावलोकितं वस्तु सर्वं परित्यजेत् । तत्सर्वं शिवलिङ्गाय नार्पयेत् ॥ ४४ ॥

---

1. मूलमन्त्रं समुपदिशेत्—क. घ. छ. ट. ठ. ढ. त. द. प.
2. विध्युक्तक्रममाचरेत्—ग. च. झ.
3. देहे प्राणं—ग. च. झ.
   देहं प्राणे—ध.
   देहप्राणौ—ख.
4. प्राणं—ग. च. झ.
5. लिङ्गं—ध.
6. अन्यदृष्टिनिपातनं तद्द्रव्यं—घ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शुद्धद्रव्यं समासाद्य[1] लिङ्गानां च[2] समर्पणम्[3] ।
इति व्रतसमायुक्तः वीरशैवो विशिष्यते ॥ ४५ ॥

[निराभारवीरशैवलक्षणम्]

विशेषशैवमाख्यातं निराभारं[4] ततः शृणु ।
सर्वसंसार[5]सौख्यानि त्यक्त्वा चित्तं[6] शिवेऽर्पयेत्[7] ॥ ४६ ॥

दण्डकौपीनकाषायजटावल्कलधारकः[8] ।
मुण्डी वा शिवचिह्नानि धारयेदजिनादिकम् ॥ ४७ ॥

इतरानिरीक्षितशुद्धद्रव्यं सम्पाद्य लिङ्गेभ्यः समर्पयेत् । एतादृश-व्रतसमायुक्तः वीरशैवः विशेषवीरशैवो भवति ॥ ४५ ॥

हे षण्मुख ! एतावत्पर्यन्तं विशेषवीरशैवात्मकभक्तस्थलं सङ्ग्रहेण निरूप्य, इतः परं निराभारवीरशैवात्मकजङ्गमस्थलं निरूप्यते— निराभार-वीरशैवः सर्वाणि सांसारिकसुखानि विहाय सांसारिकसर्वविषयसुखेभ्यो विरक्तं चित्तं शिवलिङ्गे लयं प्रापयेत् ॥ ४६ ॥

स एव वीरशैवः दण्डं कौपीनं काषायाम्बरं जटां वल्कलं च धारयन् मुण्डी वा भूत्वा भस्मरुद्राक्षादीनि शिवचिह्नानि कृष्णाजिन-व्याघ्राजिनादीनि च धारयेत् ॥ ४७ ॥

---

1. समापद्य–थ. प.
   समापाद्य–क. त. द.
2. लिङ्गाङ्गानां–क. च. छ. ट. त. थ. द. प.
3. प्रसर्पणम्–क. ख. घ. ट. ठ. ढ. त. द. प.
4. निराधारं–ग. च. झ.
5. संहार–ग. च. झ.
6. लिङ्गं–थ.
7. शिवे लयेत्–क. ख. घ. छ. ट. ठ. ढ. त. थ. द. ध. प.
8. धारकाः–ढ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भिक्षाशी नियताहारः सुखसंसारवर्जितः ।
निराभारीति[1] विज्ञयः[2] स एव परमः शिवः[3] ॥ ४८ ॥

[वीरशैवानां सर्वेषामपि सामान्यविधयः]

वीरमाहेश्वराणां च सामान्य[4]व्रतमुच्यते[5] ।
पूर्वोक्तशिवमुद्रासु तद्धारिषु[6] च सर्वतः ॥ ४९ ॥

अर्थतः प्राणतः प्राज्ञः भक्तिं कुर्यात् दृढां[7] सुत !
पापं तेषु न वक्तव्यं स्वयमेव कदाचन ॥ ५० ॥

सः भिक्षान्नभोजी नियमिताहारः अल्पसुखदायकसंसारवर्जितः जङ्गमः निराभारिवीरशैवो भवति । स च साक्षात् परशिव एव ॥ ४८ ॥

इदानीं पूर्वोक्तवीरमाहेश्वराणां सामान्यव्रतमुच्यते । पूर्वोक्तासु शिवमुद्रासु तादृशमुद्राधारिषु इन्द्रादिषु सर्वेषु च— ॥ ४९ ॥

हे सुत ! प्राज्ञः वीरमाहेश्वरभक्तः अर्थैः प्राणैश्च अविच्छिन्नभक्तिं कुर्यात् । शिवसम्बद्धेषु च स्वयं कदाऽपि पापवचनानि न ब्रूयात् ॥ ५० ॥

---

1. निराधारेति–ध.
   निराभारइ–क. ख. घ. त. वर्जम् अन्यत्र ।
   निराभारेति–छ. ट. द.
   निराहारेति–ग. च. झ.
2. विज्ञेयः–ग. च. झ. वर्जं अन्यत्र ।
3. स्थूलवृत्तोत्तमः शिवः–ग. छ. झ.
4. सामान्यं–त.
5. आचरेत्–ठ.
6. तदादिषु–ध.
   तत्त्वादिषु–ग. च. झ.
7. दृढं–ग. च. झ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कृते परेण चेत् पापे[1] नोपेक्षेत्[2] करणैस्त्रिभिः ।
बलवान् रक्षयेत् तत्र दुर्बलश्चेत् व्रजेत् ततः ॥ ५१ ॥
करणैस्तु[3] विहीनश्चेत् बुद्धिं तत्र न निक्षिपेत्[4] ।
स्वीकरोति यदा[5] लिङ्गं गुरुणा दीक्षयाऽणुना ॥ ५२ ॥
तदाप्रभृति[6] लिङ्गैक्यं अविनाभावयोगतः ।
देहं प्राणेन संस्थाप्य[7] प्राणं लिङ्गेन निक्षिपेत् ॥ ५३ ॥

इतरैः शिवधर्मविषये पापे कृते मनसा वाचा कायेन च तेषां उपेक्षां न कुर्यात । अत्र उपेक्षेदिति परस्मैपदप्रयोगः छन्दोऽनुरोधेन । शिवभक्तः बलवांश्चेत् तान् पापाचारिणः दण्डयित्वा वीरशैवधर्मं परिपालयेत् । यदि शिवभक्तो दुर्बलः तदा तस्मात् प्रदेशात् निर्गच्छेत् ॥ ५१ ॥

वाङ्मनःकायैः दुर्बलश्चेत् स शिवभक्तः तेषु पापाचारिषु तदीयपापाचरणेषु च मनो न प्रवेशयेत् । यः शिवभक्तः गुरुणा दत्तं शिवलिङ्गं यदा दीक्षाविधानेन पञ्चाक्षरमन्त्रोच्चारणपूर्वकं स्वप्राणस्वरूपबुद्ध्या गृह्णाति— ॥ ५२ ॥

—तदाप्रभृति प्राणलिङ्गयोरविनाभावेन अभिन्नभावं जानीयात् । देहं प्राणात्मना सम्भाव्य तं च प्राणं लिङ्गात्मना भावयेत् ॥ ५३ ॥

---

1. पापं–ध.
2. नेक्षेत–ग. च. झ.
3. करणैश्च–ध.
4. तत्र विनिक्षिपेत्–ग. च. झ.
5. यथा–ढ. द. प.
6. तथाप्रभृति–द.
7. संस्थाप्यं–क.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राणेन नि[1]क्षिपेल्लिङ्गं पृथग्भावं न कारयेत् ।
वीरशैवक्रमः[2] प्रोक्तः[3] प्रायश्चित्तविवर्जितः ॥ ५४ ॥

[वीरशैवनिष्ठाः]

प्राणलिङ्गी[4] व्रते लुप्ते हस्तखड्गादवश्चयन् ।
मुखं[5] पङ्कजवत् छिन्द्यात्[6] वीर[7]भृत्यस्य लक्षणम् ॥ ५५ ॥

पुनः लिङ्गं व्यतिहारेण पूर्वोक्तप्राणात्मना सम्भावयेत् । इत्थं च देहप्राणलिङ्गानां अन्योन्यभेदभावनां न कुर्यात् । एवं प्रायश्चित्तरहितः वीरशैवक्रमो निरूपितः ॥ ५४ ॥

स्कान्दे—

"गुरुणा दत्तलिङ्गं तु सावधानेन धारयेत् ।
प्रमादात् पतिते लिङ्गे प्राणानपि परित्यजेत् ॥
पतिते प्राणलिङ्गे यः प्राणान् धत्ते नराधमः ।
स चण्डाल इति ज्ञेयः शिवद्रोही न तं स्पृशेत् ॥"

इति ॥

अथ वीरमाहेश्वरव्रतनिष्ठां निरूपयति—

प्राणलिङ्गी स्वकीयव्रते नष्टे स्वहस्तस्थितखड्गेन अवश्चयन् स्वमुखं पद्मवत् छिन्द्यात् । एतत् वीरमाहेश्वरभृत्यस्य लक्षणम् ॥ ५५ ॥

---

1. प्रणवेन–प.
2. क्रमं–छ. ठ.
3. प्रोक्तं–छ.
4. प्राणलिङ्गे–ख. त. ध. प.
   प्राणलिङ्ग–घ. छ. ट. ढ. थ. द.
5. मुख–ग. च. झ.
6. छेद्यो–क.
7. जीव–प.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यो वा चोत्पाटयेज्जिह्वां शिवनिन्दारतस्य तु[1] ।
त्रिःसप्त[2]कुलमुद्धृत्य रुद्रलोकं[3] स गच्छति ॥ ५६ ॥
शिवनिन्दाकर्तृशिक्षा प्रायश्चित्तविवर्जि[ता]नः[4] ।

[शुद्धशैवविशेषधर्माः]

शुद्धशैवो विशेषेण मन्त्रयन्त्रप्रचारणात् ॥ ५७ ॥
शुद्धो भवति लोपेषु[5] प्रायश्चित्तविधानतः ।
[6]स्वेष्टलिङ्गे परिभ्रष्टे नष्टे दग्धे हृतेऽपि वा ॥ ५८ ॥
नीते वा मूषिकाद्यैश्च काककौलेयवानरैः ।
जप्त्वा लक्षमघोरस्य विधिना[7] लिङ्गकान्तरम् ॥ ५९ ॥

यो वा वीरमाहेश्वरः शिवनिन्दातत्परस्य जिह्वां उपाटयेत्, सः शिवभक्तिविशेषेण एकविंशतिकुलान्युद्धृत्य रुद्रलोकं प्रयाति ॥ ५६ ॥

वीरमाहेश्वरकृतं शिवनिन्दातत्परस्य दण्डनम्, प्रायश्चित्तविमुक्तं भवति । शुद्धशैवस्तु लिङ्गपतनादिशैवव्रतलोपे अघोरादिमन्त्राणां यन्त्राणां च विशेषप्रयोगेण— ॥ ५७ ॥

—तत्तल्लोपानुगुणप्रायश्चित्ताचरणेन च पूतो भवति । सः स्वेष्टलिङ्गे पतिते नष्टे दग्धे चोरैरपहृते वा— ॥ ५८ ॥

—मूषिकः श्येनः काकः शुनकः वानरः इत्यादिभिर्नीते वा अघोरमन्त्रं लक्षसङ्ख्याकं जप्त्वा आचार्यमुखेन शास्त्रोक्तविधानेन लिङ्गान्तरं— ॥ ५९ ॥

---

1. निन्दाकरस्य तु–ग. च. झ.
2. त्रिसप्त–ग. च. झ.
3. शिवलोकं–छ.
4. पद्यार्धमिदं–क. पुस्तके न दृश्यते ।
5. लोकेषु–ग. च. झ.
6. 'स्वेष्टलिङ्गे' इत्यारभ्य "पिण्डिकायां तथैव च" इत्यन्तो भागः–ग. ग. च. झ. पुस्तकेषु न दृश्यते ।
7. विधानात्–थ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रतिष्ठाप्य नयेत् शुद्धिं[1] पिण्डिकायां[2] तथैव च ।
व्रतस्य च[3] क्रियालोपे नियमस्य विलोपने ॥ ६० ॥
गायत्र्यष्ट[4]शतेनैव विशुद्धिमधिगच्छति ।

[ग्रन्थार्थनिगमनम्]

सामान्यं मिश्रकं चैव शुद्धं वीरं चतुर्विधम्[5] ॥ ६१ ॥
तत्सर्वं हि समासेन तव प्रोक्तं षडानन !
तत्त्वादिकीलकान्तानां[6] पटलानां दश क्रमात् ॥ ६२ ॥

—प्रतिष्ठाप्य संशोध्य पूजयेत् । पिण्डिकायामपि उक्तरीत्यैव समाचरेत् । शैवव्रतक्रियालोपे शैवव्रतनियमलोपे च— ॥ ६० ॥

अष्टोत्तरशतसङ्ख्याकगायत्रीमन्त्रजपेनैव शैवव्रतं विशुद्धं भवति । सामान्यशैवं मिश्रशैवं शुद्धशैवं वीरशैवमिति शैवं चतुर्विधं भवति ॥ ६१ ॥

हे षडानन ! तत् चतुर्विधमपि तच्छैवं सङ्ग्रहेण तवाभिहितम् । एवं तत्त्वभेदपटलमारभ्य मन्त्रकीलपटलान्तैः दशभिः पटलैः क्रमेण तत्त्वभेदादिकं निरूपितम् ॥ ६२ ॥

---

1. नयेल्लिङ्गं-थ.
2. पीठिकायां-ख. ग. छ. ट. ढ. थ. द. प.
   खण्डिकायां--त.
3. व्रतस्य तु-ग. च. झ.
4. गायत्र्याष्ट-ग. च. झ.
5. यथाक्रमम्-थ.
6. तत्त्वादिकेवलान्तानां-ध.
   तत्त्वादिकीलकान्तश्च-क. घ. छ. ठ. ठ. ढ. थ.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं[1] शुद्धाख्यतन्त्रं तु[2] कथितं[3] तव सुव्रत!
भुक्तिमुक्तिप्रदं नृणां सर्वकामार्थसाधनम्[4] ॥ ६३ ॥

इति श्रीवातुलतन्त्रे शुद्धाख्ये सहस्रग्रन्थसंहितायां
मन्त्रकीलो नाम दशमः पटलः
तन्त्रं च समाप्तम्[5]

—o—

हे सुव्रत! कुमार! उक्तक्रमेण मानवानां भुक्तिदायकं मुक्तिदायकं समस्तेष्टार्थदायकं चेदं शुद्धाख्यं वातुलतन्त्रं ते प्रोक्तम् ॥ ६३ ॥

इति वातुलशुद्धाख्यतन्त्र-सहस्रग्रन्थसंहिताव्याख्यायां
मन्त्रकीलो नाम दशमः पटलः
समाप्तोऽयं ग्रन्थः

—o—

॥ शिवार्पणमस्तु ॥

---

1. भेदे–क. घ. छ. ट. ढ.
   भेदाः–ख.
   शैवं–झ. ध.
   शुभे–थ.
   भेदो–त.
2. तन्त्रस्य–क. ख. घ. छ. झ. ठ. ढ. त. थ. थ. प.
3. कथितः–क. घ. छ. ट. ठ. थ. ध.
   कथिताः–ख.
4. पद्यार्धमिदं–क. ख. घ. छ. झ. ट. ठ. ढ. त. थ. ध. प. पुस्तकेषु न न दृश्यते।
5. ग्रन्थसमाप्तिवाक्यानन्तरम्–ट. ध. पुस्तकयोः—
   "ये सर्वशैवाधिकवीरशैवाः
   परं विधिज्ञानसुवीरमार्गे ।
   प्रवर्तयन्त्यव्ययभक्तियोगां[गं]
   तेभ्यो नमो विश्वपवित्रकृद्भ्यः ॥ १ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यथा मन्त्रं समुत्तार्य न त्यजेत् देहमन्दिरे ।
यथा मन्त्रं च लिङ्गं च मेलनं प्राणलिङ्गिनाम् ॥ २ ॥

इति दृश्यते ॥

–छ. पुस्तके—

दशभिः पटलानां समुत्पद्वृथभक्तियोगात् (?) ।
तेभ्यो नमो विश्वपवित्रकृद्भ्यः ॥

इति दृश्यते ॥

–क. ट. पुस्तकयोस्तु—

(कर्णाटभाषाव्याख्यानस्यान्तिमे भागे—)

श्रीदशभिः पटलानां संयुतं शुद्धाख्यतन्त्रकम् ।
कर्णाटभाषाविवृतं सम्पूर्णं शैववल्लभम् ॥

नमस्ते बहुवाख्यायामरगुण्डादिदेशिकः ।
तन्त्रवेत्रे सतां नेत्रे षट्स्थलब्रह्मरूपिणे ॥

यः सर्वशैवाधिकवीरशैवं
परं विधित्वा समवीरमार्गे ।
प्रवर्तयन्त्यव्ययभक्तियोगाः
तेभ्यो नमो विश्वपवित्रकृद्भ्यः ॥

॥ शान्तसोमेश्वराय नमः ॥ वातुलतन्त्रं समाप्तम् ॥
॥ मङ्गलमहाश्रीश्रीश्रीश्रीश्रीश्रीश्रीश्री ॥

[आदित्यवारद पञ्चमियल्लि 8 तासिनल्लि
वातुलतन्त्र मुगिसितु ॥]

—इति दृश्यते ॥

—o—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वातुलाशुद्धागमस्य

अ नु ब न्धाः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

॥ श्रीरस्तु ॥

श्रीवातुलशुद्धागमे-

सर्वप्रायश्चित्तपटलः

—o—

प्रायश्चित्तविधिं वक्ष्ये सर्वसम्पत्करं नृणाम् ।
प्रायो विनाश इत्युक्तः सन्धानं चित्तमेव वा ॥ १ ॥

क्रूरसान्त्वनकं चैव प्रायश्चित्तमिति स्मृतम् ।
मन्दिरे चलिते भिन्ने पतिते नाशिते भवेत् ॥ २ ॥

तद्राष्ट्रनाशनं कृत्वा नृपस्य मरणं ध्रुवम् ।
बालहर्म्यं ततः कृत्वा स्थापयेद्विधिपूर्वकम् ॥ ३ ॥

पूर्ववद्भवनं कृत्वा सम्प्रोक्षणमथाचरेत् ।
लिङ्गे आधारपादैश्च [दे च] नद्यावर्तस्थलेऽपि च ॥ ४ ॥

शुद्धद्वारस्य द्वारे तु चालनैर्न तु कारयेत् ।
तद्राष्ट्रनाशनं प्रोक्तं नृपतिस्त्वन्यथा भवेत् ॥ ५ ॥

बालहर्म्यं ततः कृत्वा जपेत् पाशुपतं शतम् ।
सम्प्रोक्षणं ततः कृत्वा जपेत् पाशुपतं शतम् ॥ ६ ॥

भवने हीने कर्तव्यं लिङ्गपीठविहीनके ।
लिङ्गपीठविहीने च यामहीनं न कारयेत् ॥ ७ ॥

तत्तद्धीनं तु संयोज्य जिह्महीनं न दोषभाक् ।
हर्म्यस्य चलितस्य स्यात् सुष्ठु हर्म्यं समाचरेत् ॥ ८ ॥

बालहर्म्यक्रमं कृत्वा पूजायोग्यं तु कारयेत् ।
पुनर्भवनकं कृत्वा सर्वालङ्कारसंयुतम् ॥ ९ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मसूरादिस्थूपिपर्यन्तं वर्णं प्रति विशेषतः ।
अलक्षणं च जीर्णं च लक्षणोक्तक्रमेण तु ॥ १० ॥

एतद्वर्गेण देवानां बाललिङ्गं तु योजयेत् ।
प्रार्थयेत्तु नमस्कृत्वा त्रिपक्षे च त्रिमासके ॥ ११ ॥

अब्दे तृतीये कर्तव्यं विज्ञापयेत्तु सन्निधौ ।
अधिष्ठानस्य वर्गे तु जीर्णिते सम्भवे यदि ॥ १२ ॥

एकादिसप्तपर्यन्ताङ्गुलानां गुलिकं क्रमात् ।
न्यूने तज्जीर्णिते चैव तस्य वर्गं न दोषभाक् ॥ १३ ॥

तदूर्ध्वे हीनकर्तव्यं पुनस्सन्धानमाचरेत् ।
पादवर्गे त्र्यङ्गुलं तु जीर्णिते स्पन्दितेऽपि वा ॥ १४ ॥

तद्वर्गं संहितं कृत्वा तदूर्ध्वं न च कारयेत् ।
प्रस्तरस्य गले वर्गे त्र्यङ्गुलस्य विहीनके ॥ १५ ॥

तद्वर्गं संहितं कृत्वा तद्वर्गं न विकारयेत् ।
पुनस्सन्धानकं कृत्वा शिखरं तु तत्त्र्यङ्गुलम् ॥ १६ ॥

स्फुटिते खण्डिते भिन्ने दोषयुक्तं न दोषभाक् ।
स्थूपिवर्गस्य चाङ्गुल्यं द्व्यङ्गुलं तु विहीनके ॥ १७ ॥

दोषाश्रयं न कर्तव्यं ऊर्ध्वे सन्धानमाचरेत् ।
हीनाधिक्यं तु यद्वर्गे राजा राष्ट्रं विनश्यति ॥ १८ ॥

तद्दोषशमनार्थाय स्नपनं शान्तिहोमकम् ।
प्रसादमुख्यैश्च जपेत् मन्त्रं पाशुपतं शतम् ॥ १९ ॥

स्थूपिप्रधानमूलस्य चलिते चक्रभिन्नके ।
पिप्पलकोटकैश्चैव पुरापातोऽर्थहीनके ॥ २० ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

राजराष्ट्रस्य शोकं च श्वभ्रं त्यक्त्वा तु संभवेत् ।
एवमन्यं परिग्राह्य लक्षणोक्तक्रमेण तु ॥ २१ ॥

पत्मं[द्मं] कर्णस्य कुम्भे तु पालिका[यां] च कुध्म[ट्म]लम् ।
षडङ्गसंहितं [कृत्वा] सन्ध्या[न्धा]नेन तु [स]माचरेत् ॥ २२ ॥

सम्प्रोक्षणं ततः कृत्वा शान्तिहोमं शतं जपेत् ।
तद्वर्गस्फुटिते भिन्ने नाशिते चैव हीनके ॥ २३ ॥

तद् [ग्राम]वासिनः सर्वे रोगशोकभयापहम् ।
पुनः सन्धानकं कृत्वा स्नपनं चैव होमकम् ॥ २४ ॥

शिखामन्त्रं सहस्रं च जपेत् पाशुपतं शतम् ।
शिखराकृतिभिः ष . . . . मथापि वा ॥ २५ ॥

ग्रामश्रीस्त्वन्यथा कृत्वा धामश्रीस्त्वन्यथा भवेत् ।
. . . . कुम्भाभिषेचनम् ॥ २६ ॥

कर्णे च प्रस्तरपादे अधिष्ठ . . . . वर्गके ।
. . . . ने पद्मविच्छेदे . . . . ॥ २७ ॥

. . . . ङ्कुष्ठनासिकम् ।
बलदण्डस्य विच्छेदे माबाबोधिकबापालिते (?) ॥ २८ ॥

कम्पे च . . . . . हीने सस्यनाशं न संशयः ।
पुनःसन्धानकं कृत्वा शान्तिहोमं तु कारयेत् ॥ २९ ॥

. . चौ शिखरौ देवान् जीर्णोद्धारक्रमं कुरु ।
भवने[दे]व . . दग्धे च वह्नीनां तु भयं भवेत् ॥ ३० ॥

व्यपोह्याङ्गार[कार]कान् सर्वान् पश्चात् सन्धानमाचरेत् ।
शान्तिहोमं ततः कृत्वा पुण्याहं वाचयेत् ततः ॥ ३१ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लिङ्गे च प्रतिमे[1] चैव वह्निना दग्धसम्भवेत्[2] ।
ज्वरव्याधिनिपीठं[डं] च लोकस्य भयमावहेत् ॥ ३२ ॥

क्षीरे धाराभिषेकं तु जलधाराभिषेचनम् ।
सम्प्रोक्षणं ततः कृत्वा शान्तिहोमं समाचरेत् ॥ ३३ ॥

अग्निदग्धे च यद्बिम्बं तद्बिम्बे दूषिते सति ।
नृपस्य मरणं घोरं उष्णरोगेण सम्भवेत् ॥ ३४ ॥

बिम्ब[म]न्यन्नवं ग्राह्यं पूर्वोक्तैर्लक्षणैर्युतम् ।
सम्प्रोक्षणं ततः कृत्वा शान्तिहोमं तु कारयेत् ॥ ३५ ॥

अग्निना स्फुटिते छिन्ने प्रत्यङ्गोपाङ्गहीनके ।
माषमात्रत्रि[त्र]यं चैव तिलमात्रतिलं तथा ॥ ३६ ॥

इदं व[तु]दृष्टवत् कृत्वा पूजाकार्यं न दोषभाक् ।
सद्येन शान्तिकुम्भं तु कृष्णलोहनमाचरेत् ॥ ३७ ॥

अथवा लोहजे बिम्बे पूर्ववत् परिकल्पयेत् ।
लोहजानां तु बिम्बानां विशेषं किञ्चिदस्ति भीः ॥ ३८ ॥

कर्णोदरशिरोवक्षोबाहुको[कू]र्परपाणयः ।
कटिजङ्घे महाङ्गानि जीर्णैश्चैव तु कारयेत् ॥ ३९ ॥

राजराष्ट्रस्य नाशं च भूपतिस्त्वन्यथा भवेत् ।
जीर्णबेरं तु योजित्वा[3] तद्देवं कुम्भमारभेत्[4] ॥ ४० ॥

---

1. प्रतिमायाम्–
2. दग्धसम्भवे–
3. योजयित्वा–
4. आरभेत–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तद्दृष्ट्या तत्प्रमाणेन तद्बिम्बं पूर्ववद्भवेत् ।
सम्प्रोक्षणं ततः कृत्वा प्रतिष्ठां कारयेत् ततः ॥ ४१ ॥

अङ्गहीने तु यत्प्राप्ते क्षुद्भयं ग्रामवासिनाम् ।
नेत्रं च नासिका चोष्ठं तालुं[लु] चैव तु कारयेत् ॥ ४२ ॥

कर्णं चाङ्गुलिमङ्गानि पुनः सन्धानमाचरेत् ।
सम्प्रोक्षणं ततः कृत्वा तिथिवारं विना चरेत् ॥ ४३ ॥

अथवासनानि [1] यत्कर्म सद्यः सर्वं समाचरेत् ।
केसरो नखभूषाश्च जटामालेन्दुशेखरम् ॥ ४४ ॥

शिरसे [2] भूषणे ये[चै] तत्प्रत्सां[त्यं]गं च विहीनके ।
तद्ग्रामनृपति[ते]र्गेहे शोकदुःखभयावहम् ॥ ४५ ॥

पूर्वं सन्धानयेत् [कं] कृत्वा सम्प्रोक्षणमथाचरेत् ।
पादुकावाहनस्रग्विलेपनं नरवाहनम् ॥ ४६ ॥

नखवेडमरुभ . . मकुटं भूषणौ बेरे [3] ।
शङ्खचक्रशिरश्चक्रं हरिणं टङ्कशूलकम् ॥ ४७ ॥

अक्षमालाग्निकं चैव पाशपद्मायुधान्यपि ।
पीठं प्रभावच्छत्रा च [4] प्रत्यङ्गं च विहीनके ॥ ४८ ॥

राजा [ज्ञि]वाहनहीने तु चतुरङ्गविहीनके ।
शेषाण्यलङ्कृतानां च नाशनं भवति ध्रुवम् ॥ ४९ ॥

---

1. अधिवासनानि–
2. शिरसि–
3. भूषणाम्बरे–
4. पीठं प्रभावलिं छत्रम्–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुनःसन्धानकं कृत्वा [सं]प्रोक्षणमथाचरेत् ।
यानकालेऽन्यकाले वा प्रतिमापतिते भुवि ॥ ५० ॥

नृपस्य मरणं शीघ्रं दुर्भिक्षं जायते भुवि ।
स्नपनं शान्तिहोमं च जपेत् पाशुपतं शतम् ॥ ५१ ॥

पुनर्यानक्रमेणैव पूर्वोक्तेनैवमाचरेत् ।
परिवारविहीने च दासीदासविनाशनम् ॥ ५२ ॥

स्थापयेत् पूर्ववत् पश्चात् कृत्वा तु स्थापनोक्तवत् ।
परिवाराङ्गवैकल्ये पुनःसन्धानमाचरेत् ॥ ५३ ॥

तत्तन्मन्त्रेण संयुक्तं समिद्भिः सर्पिसर्षपात्[न्] ।
चरुणा जुहुयाद्धीमान् प्रत्येकं तु शतं क्रमात् ॥ ५४ ॥

सम्प्रोक्ष्याभ्यर्च्य गन्धाद्यैः पुण्याहं वाचयेत्ततः ।
आस्थानमण्डपा[पे] हीने भूषणालङ्कृ[तौ]तिस्तथा ॥ ५५ ॥

परिवेषविहीने च च[नृ]पो दुर्जयमाप्नुयात् ।
स्नपनं च ततः कृत्वा पुनः सन्धानमाचरेत् ॥ ५६ ॥

सिंहासनं च पर्यङ्कं शिबिकाबाधहीनके ।
स्तम्भभूषणहीने च वितानध्वजहीनके ॥ ५७ ॥

मुक्तास्रक्पुष्पमालानां मङ्गलाङ्कुरहीनके ।
सस्यानां नाशनं प्रोक्तं गवानां नाशनं भवेत् ॥ ५८ ॥

तन्मन्त्रेण शतं जप्त्वा पुनर्भूषणमाचरेत् ।
नृत्तवाद्यं च कालेषु कलहं यत्र सम्भवेत् ॥ ५९ ॥

तद्ग्रामवासिनः सर्वे ग्रहपीडाभयावहाः ।
तन्मूलैश्च शतं जप्त्वा जपेत् पाशुपतं शतम् ॥ ६० ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्काले चाग्निदग्धे च स्थाप्यमण्डपमादिशेत् ।
तरङ्गैश्च वितानैश्च स्तम्भभूषणवह्निना ॥ ६१ ॥

शिबिकामासनाद्यादि अग्निदग्धे तमावहेत् ।
ग्रामश्रीस्त्वन्यथा चैव ग्रामश्रीस्त्वन्यथा भवेत् ॥ ६२ ॥

प्रतिमामन्यतः स्थास्य[प्य] शीघ्रगं छिन्नकेतनम् ।
व्यपोह्याङ्गारकान् कृत्वा भूषयेत् भूषणार्हकम् ॥ ६३ ॥

गोमयालेपनं कृत्वा पिष्टचूर्णैरलङ्कृतम् ।
पुण्याहं पञ्चगव्यैश्च प्रोक्षयेत्तु शिवाम्भसा ॥ ६४ ॥

स्नापनं कारयेद्धीमान् शान्तिहोमं तु कारयेत् ।
पुनर्विज्ञाप्य देवेशं विशेषस्थानमण्डपे ॥ ६५ ॥

भुवने[1] शयनस्थानहीने राष्ट्रभयङ्करम् ।
भोगपूजाविहीने च राजजन्म विनश्यति ॥ ६६ ॥

पुनःसन्धानकं कृत्वा मण्डपं पूजयेत्ततः ।
पर्यङ्कमुपधानं च ऊर्ध्वाधश्छा[श्शा]यनाय च ॥ ६७ ॥

कृत्वा युक्तं वितानेन तरङ्गैश्च विहीनके ।
तद्ग्रामवासिनः सर्वे रोगादिपीडनार्तिकम् ॥ ६८ ॥

शिवमन्त्रं शतं जप्त्वा एतद्द्रव्यैश्च न्यूनकम् ।
कृत्वा तु अस्त्रमन्त्रेण प्रोक्षयेत्तु शिवाम्भसा ॥ ६९ ॥

चोरैर्वा अग्निदग्धैर्वा ग्राह्ये तद्भूषणार्हकम् ।
तद्ग्रामनाशनं[2] हन्ति सस्यानां नाशनं भवेत् ॥ ७० ॥

---

1. भवने–
2. तद्ग्रामवासिनः–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्थानशुद्धिं ततः कृत्वा मण्डपाराधनं कुरु ।
शय्यागृहे तु संयोज्य पादुकां खड्गमेव च ॥ ७१ ॥

पादुकाराधने हीने शिबिकाद्यादिहीनके ।
तन्मन्त्रेण शतं जप्त्वा पुण्याहं पञ्चगव्यकैः ॥ ७२ ॥

नृत्तगीतादिवाद्ये च हीने स्थानबलक्षयम् ।
तद्दोषशमनार्थाय शान्तिकुम्भाभिषेषयेत्[1] ॥ ७३ ॥

भक्तादिस्तोत्रहीने च सा च भक्तिर्विनश्यति ।
तद्दोषशमनार्थाय शान्तिकुम्भाभिषेचयेत्[2] ॥ ७४ ॥

स्वस्तिसूक्तं च खड्गं च खेटकायुधमित्यपि ।
छत्रचामरकालां चै[3] हीने राष्ट्रभयावहम् ॥ ७५ ॥

तन्मन्त्रेण शतं जप्त्वा जपेत् पाशुपतं शतम् ।
आवाहनार्घ्यपाद्यादि[दौ]पुष्पास्रग्दामादिषु[4] ॥ ७६ ॥

ताम्बूलापूपनैवेद्यं [द्ये]पानीयं[ये]मुखवासकम् [के] ।
कर्पूरवर्तितद्दीपं[पे] हीने धूपादिहीनके ॥ ७७ ॥

जायानां नाशनं चैव बालानां नाशनं भवेत् ।
तत्तद्द्रव्येण संयोज्य तन्मन्त्रेण शतं जपेत् ॥ ७८ ॥

शयनाह्वानसांनिध्ये सुप्ते वा यदि सम्भवेत् ।
चौरैर्वाऽप्यग्निदग्धैर्वा राज्ञः शोकभयावहम् ॥ ७९ ॥

---

1. शान्तिकुम्भाभिषेचनम् ।
2. शान्तिकुम्भाभिषेचनम् ।
3. तालांश्च–
4. पुष्पस्रङ्मणिदामसु ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्प्रोक्षणं ततः कृत्वा तत्तद्देवान् सुपूजयेत् ।
मूलेन देवं देवीश्च स्नपनं शान्तिहोमकम् ॥ ८० ॥

तन्मन्त्रेण शतं जप्त्वा जये[पे]त् पाशुपतं शतम् ।
सुरामांसं च पिष्टादीन् श्वानगर्दभकुक्कुटैः ॥ ८१ ॥

सूकरैर्वानरैश्चैव प्रतिलोमरजस्वलैः ।
नरपक्षिमृते जाते तिर्यग्जाते मृते तथा ॥ ८२ ॥

गर्भगेहे प्रवेशं[शे] च स्पृष्टे लिङ्गे च कौतुकम्[के] ।
नृपवाहनहीने च तद्राष्ट्रं शोकमावहम् ॥ ८३ ॥

सम्प्रोक्षणं ततः कृत्वा शताष्टकलशान्वितम् ।
वक्त्रमण्डपसंयुक्तं प्रतिमामण्डपं विशेत् ॥ ८४ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पूर्वजङ्घस्य[1] दैर्घ्यं तु सप्तविंशाङ्गुलं[2] भवेत् ।
जानूरुद्वयमङ्गुल्यमपजङ्घा तु तत्समम् ॥ १२० ॥

अपरं चतुरङ्गुल्यमेवमेव क्रमेण तु ।
उक्षायामं तु[3] वै वत्स ! पञ्चदशाङ्गुलं[4] भवेत् ॥ १२१ ॥

वृषणं चतुरङ्गुल्यं[5] द्व्यङ्गुलं नाभिकुण्डलि ।
एवं लक्षणमाख्यातं वृषभस्य शिखिध्वज ! ॥ १२२ ॥

शङ्खवर्णनिभं देहं श्टङ्गौ चापो मसप्रमभम्[6] ? ।
डाडिमी[7]कुसुमप्रख्यं श्रोत्रयोरुभयोरपि ॥ १२३ ॥

सितकृष्णद्विनेत्रं स्याद्भ्रुवो मञ्जरसन्निभौ[8] ।
आस्यमङ्कितलं बीजं वृषणं खुरमेव च ॥ १२४ ॥

जपापुष्पनिभाकारमङ्गुलं पिङ्गसन्निभम् ।
अङ्गुलाग्रातिकृष्णं स्याद्देवमालिख्य बुद्धिमान् ॥ १२५ ॥

जान्वौ तु[9] नूपुरच्छन्नं[10] ग्रीवे चामरलम्बितम्[11] ।
किङ्किणीमूलमाभूष्य ? करे घण्टावलम्बितम् ॥ १२६ ॥

---

1. जङ्घायाः-
2. सप्तविंशत्यङ्गुलं-
3. उक्षायामस्तु-
4. पञ्चदशाङ्गुलः-
5. वृषणः चतुरङ्गुलः-
6. शृङ्गे चापसमप्रभे-
7. दाडिमी-
8. भ्रुवौ मञ्जरसन्निभे-
9. जानुनी-
10. च्छन्ने-
11. ग्रीवात्वामरलम्बिता-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मध्ये शिवासनं वाऽपि लिङ्गं वा शूलमेव वा ।
आर्षेवा दैविके वाऽपि कारयेद्देवमेव तु ॥ १२७ ॥

अन्यलिङ्गानि चै[1] वत्स ! केवलं वृषभं कुरु ।
अष्टमङ्गलरूपाणि परितः कल्पयेत्क्रमात् ॥ १२८ ॥

वृषोच्च द्वे वा भागैकं भागं कुर्याद्वृषासनम् । ?
दले षोडशभिर्युक्ते कर्णिकाकेसरैर्युतम् ॥ १२९ ॥

द्विपार्श्वे चामरौ दीपौ पूर्णकुम्भं तु वामके ।
अद[2]श्चोर्ध्वं लिखेद्विद्वान् लक्षणेन समन्वितम् ॥ १३० ॥

नासावर्णसमायुक्तं पुन्नागं कुसुमं[3] लिखेत् ।
युगलोचनरिक्षं तु कारयेन्नेत्रमोचनम् ॥ १३१ ॥

त्रिमूर्त्यायतनं ते तु हंसं तार्क्ष्यं वृषं लिखेत् ।
ऊर्ध्वे तु वृषमालिख्य कल्पयेत्तु विशेषतः ॥ १३२ ॥

प्रधानध्वजमेवोक्तमन्येषां केवलं वृषम् ।
अष्टदिग्ध्वजमारोप्य दैविके तु षडानन ! ॥ १३३ ॥

लोकपालकलिङ्गं चेत्प्रधानं वृषभध्वजम् ।
पावकाद्देवपर्यन्तं लोकेशावाहनान् लिखेत् ॥ १३४ ॥

शिल्पिकर्म विसृज्याथ दक्षिणां दापयेत्ततः ।
प्रोक्षयेद्गन्धतोयेन लम्बकूर्चोपरि न्यसेत् ॥ १३५ ॥

1. चेत्–
2. अध–
3. पुन्नागकुसुमं–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चन्दनं चाक्षतं पुष्पं तैलचूर्णं ददेत्क्रमात्[1] ।
जलाशयं तु सङ्कल्प्य शिवाग्रे स्थण्डिलोपरि ॥ १३६ ॥

दर्पणं विन्यसेन्मध्ये यदृच्छान्वितं गुह ! ? ।
यामं यामार्धसूत्रं तु विन्यसेत्तु जलाशये ॥ १३७ ॥

जलादुत्तीर्थयामान्ते वृषयागं समाचरेत् ।
ब्रह्मजज्ञानमन्त्रेण विन्यसेदङ्घ्रिदेशके ॥ १३८ ॥

इदं विष्णिवतिमन्त्रेण वृषस्य उपरि न्यसेत् ।
त्रियम्बकेन मन्त्रेण वृषपृष्ठे तु विन्यसेत् ॥ १३९ ॥

आपो हि ष्ठेति मन्त्रेण लाङ्गूलाग्रे तु विन्यसेत् ।
विश्वतश्चक्षुरित्युक्तं[2] विन्यसेच्चक्षुमध्यमे ? ॥ १४० ॥

प्रणवेन समायुक्तं हृदयं चास्त्रकौतुकम् ।
तीक्ष्णशृङ्गाय विद्महे शिरसा सह योजयेत् ॥ १४१ ॥

चूलिको वेदपालाय धीमहि कवचस्तथा ।
नेत्रं तन्नो वृषश्चेति प्रचोदयादस्त्रमन्त्रतः ॥ १४२ ॥

षडङ्गान्[3] हृदयादीनि विन्यसेत्तु विचक्षणः ।
षञ्चविंशतितत्त्वानि विन्यसेत्तु तदन्तिके ॥ १४३ ॥

गन्ध[4]पुष्पं तथा धूपं दीपं नैवेद्यकं ददेत्[5] ।
वृषगायत्रिमुच्चार्य विन्यसेद्वृषकुम्भके ॥ १४४ ॥

---

1. दद्यात् क्रमात्–
2. रित्युक्ता–
3. षडङ्गानि–
4. गन्धं–
5. दद्यात्–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उक्षं[1] पूर्वघटे न्यस्य श्टङ्गिणं दक्षिणे तथा ।
नन्दि[2] वारुणदिग्भागे वेदपादं तथोत्तरे ॥ १४५ ॥

पावके गोपतिं चैव उग्रशृङ्गं तु राक्षसे ।
वायव्ये वृषनाथं तु ब्रह्मोदरं चैशके घटे ॥ १४६ ॥

तार्क्ष्यगायत्रि[3]मुच्चार्य मध्यकुम्भे तु विन्यसेत् ।
तार्क्ष्यं पूर्वघटे न्यस्य गरुडं दक्षिणे घटे ॥ १४७ ॥

वारुणे स्वर्णपक्षं तु वैनतेयं तथोत्तरे ।
आग्नेय्यां सर्पहारी च गरुत्मा चैव नैरुत्ते[4] ॥ १४८ ॥

वायव्यां नागहारी च[5] विषाशनं चैषके घटे ।
हंसशुचीति मन्त्रेण हंसकुम्भं तु विन्यसेत् ॥ १४९ ॥

विहङ्ग[6]पूर्वकुम्भे तु वेदमाता तु[7] पावके ।
वेदविद्दक्षिणे[8] भागे पक्षिराजस्तु[9] नैरुत्ते ॥ १५० ॥

वारुणे तु घटे विद्वान् तुण्डशीर्षं तुमेव च[10] ।
मारुते तु घटे वत्स! ब्रह्मवाहनमेव च ॥ १५१ ॥

---

1. उक्षाणं–
2. नन्दिनं–
3. तार्क्ष्यगायत्री–
4. दर्पहारिणं गरुत्मन्तं नैर्ऋते–
5. नागहारिणं–
6. विहङ्गं–
7. वेदमातरम्–
8. वेदविदं दक्षिणे–
9. पक्षिराजं–
10. तमेव च–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शुकवाहं तथा सौम्य[1] । हंसरूपं तथैशके ।
एकैकमावृता नष्टा ? कुम्भान् कुम्भेषु विन्यसेत् ॥ १५२ ॥

ग्रहादीन् पूर्ववत्कुर्याद्दैशिकेन विचक्षण[2] ।
देवतामण्टपे वाऽपि वाहना[3]मण्टपेऽपि वा ॥ १५३ ॥

गोमयालेपनं कुर्यात्प्रोक्षयेदस्त्रमन्त्रतः ।
स्थण्डिलं शालिना कुर्यादेकैकं तु पृथक् पृथक् ॥ १५४ ॥

नवध्वजं चोत्तमं ज्ञेयमष्टकेतुं च मध्यमे[4] ।
अधमं ध्वजमेकं स्याद्यथावित्तानुसारतः ॥ १५५ ॥

मघादीशान[5]पर्यन्तं स्थण्डिलं नव कल्पयेत् ।
द्रोणतोयेन सम्पूर्णान् कुम्भान् बिम्बसमप्रभान् ॥ १५६ ॥

तन्तुना चित्रितान् सर्वानेकद्वित्रिय[6]तन्तुभिः ।
नवकुम्भान् सुसंस्थाप्य परं प्रति विशेषतः ॥ १५७ ॥

अष्टदिक्षु ध्वजं चेत्तु मध्ये वृषभदैवतम् ।
परितोऽष्टघट[7] न्यस्त्वा वृषविघ्नेश्वरान् क्रमात् ॥ १५८ ॥

त्रिमूर्त्यायतनं चेत्तु स्थण्डिलत्रितयं भवेत् ।
वृषकुम्भं न्यसेन्मध्ये वैनतेयं तु दक्षिणे ॥ १५९ ॥

---

1. सौम्ये-
2. विचक्षणः-
3. वाहन-
4. अष्टकेतु च मध्यमम्-
5. मघ्यादीशान-
6. नेकद्वित्रैः-
7. घटान्-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्तरहंसकुम्भं[1] स्यात्तद्विघेशकुम्भकान् ।
स्थण्डिलं ? पश्चिमे भागे ध्वजं तस्योपरि न्यसेत् ॥ १६० ॥

ससूत्रान् सापिधानांश्च गन्धाद्यैरर्चयेत्क्रमात् ।
धूपदीपं ददेत्पश्चान्नैवेद्यं दापयेत्क्रमात् ॥ १६१ ॥

नैवेद्यं पायसं गौश्यं मुद्गां[2] सम्पादयेत्पृथक् ।
पूजयेत्तु विशेषेण ततो होमं समारभेत्[3] ॥ १६२ ॥

पञ्चाग्नि[4] वा तथैकाग्निं कल्पयेत्कल्पवित्तमः ।
पञ्चाग्निं[5] चेच्चतुर्दिक्षु प्रधानं चैशदेशके ॥ १६३ ॥

एकाग्निं चेद्विशेषेण पूर्वे वा चैषकेऽपि वा ।
अग्निकार्योक्तमार्गेण वृषाग्निं परिकल्पयेत ॥ १६४ ॥

समिदाज्यचरुं मुद्गतिलसर्षपकान् यवान् ।
वृषगायत्रिमन्त्रेण प्रत्येकं पञ्चविंशति[6] ॥ १६५ ॥

हुत्वा हुत्वा तु वै वत्स ! स्पर्शाहुतिमथाचरेत् ।
मूर्तिगायत्रिमुच्चार्य हुत्वा चैकैकमाहुतिः[7] ॥ १६६ ॥

---

1. उत्तरे हंसकुम्भः-
2 गौल्यं मुद्गं-
3. समारभेत-
4. पञ्चाग्नीन्-
5. पञ्चाग्नीन्-
6. पञ्चविंशति-
7. एकैकामाहुतिं-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वृषाङ्गं तु हुनेत्पश्चा[1]ज्जयादीन्[2] तत्र हूयते ।
अग्न्याधानं हुनेत्पश्चाद्राष्ट्रभृच्च हुनेत्पुनः ॥ १६७

गरुडगायत्रिमुच्चार्य हुनेत्पञ्चदशाहुतिः[3] ।
हंसश्शुचीति मन्त्रेण हुत्वा चैव तथा भवेत् ॥ १६८ ॥

घृतेन जुहुयात्सर्वं व्याहृतिं च हुनेत्पृथक्[4] ।
प्राणाहुतिक्रमेणैव होमयेत्प्र[5]णवेन तु ॥ १६९ ॥

परिषेचतं[6] ततः कुर्यात्पुनः पुण्याहमाचरेत् ।
वृषगायत्रिमन्त्रेण वृषस्य हृदये न्यसेत् ॥ १७० ॥

पश्चाद्दण्डं तु सङ्कल्प्य प्रासादस्य समं भवेत् ।
स्तूप्यन्तं? नासिकान्तं वा कन्धरं गोपुरान्तरम् ॥ १७१ ॥

चम्पकं चन्दनं चैव बिल्वकं पनसं तथा ।
वैणवं देवदारुं च याज्ञिकैश्च तरुं गुह ! ॥ १७२ ॥

जाति[7] च क्रमुकं चैव दण्डान्यं क्वैव? सङ्ग्रहेत्[8] ।
त्रितालनाहमूलं स्यात्क्रमशो ग्रन्धिकं कृशम् ॥ १७३ ॥

---

1. जुहुयात्पश्चा-
2. जयादिः-
3. जुहुयात्पञ्चदशाहुती-
4. जुहुयात् पृथक्-
5. जुहुयात् प्र-
6. परिषेचनं-
7. जातिं-
8. संगृह्णीयात्-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अन्तस्साराणि सर्वाणि दारवं[1] तत्पुमान्विदुः ।
बहिस्साराणि सर्वाणि नारीरूपं भवेद्गुह ![2] ॥ १७४ ॥

यागान्ते वर्जयेन्नारी कल्पयन्तं पुमान् विदुः ।
एवं दण्डानि[3] सङ्कल्प्य विशेषं निश्चितं त्विह ॥ १७५ ॥

हर्म्यं नवतलं[4] चेत्तु ध्वजं प्रतितलं[5] कुरु ।
उत्तमं त्विति विख्यातं त्रितालघ्नां तु मध्यमम् ॥ १७६ ॥

तलैकाधमं[6] ज्ञेयं प्रासादमहतिर्भवेत् ? ।
कल्पप्रासादकं चेत्तु द्विगुणं दण्डदैर्घ्यकम् ॥ १७७ ॥

मानं वाऽप्येवमेवं स्याद्यामायामसमं भवेत् ।
स्थानानि सकलं चेत्तु कोणकोणय तद्दिशि ? ॥ १७८ ॥

प्रधानं पूर्वदिग्भागे शाङ्करे वा विशेषतः ।
अष्टदिक्षु ध्वजं कुर्याद्राज्यार्द्धि[7] चैव वै गुह ! ॥ १७९ ॥

यष्टित्रयं ततः कुर्याद्याज्ञिके त . . . भिर्भवेत् ।
आयामं रत्निमात्रं स्यात्तदर्थं[8] विस्तरं भवेत् ॥ १८० ॥

घनं तु कौशिकाङ्गुल्यवर्धावटमथैकतः ? ।
सुषिरद्वयमन्येषां योजयेत्सुदृढं सुधीः ॥ १८१ ॥

1. दारूणि–
2. नारीरूपाणि भवेयुर्गुह !–
3. दण्डान्–
4. नवतालं–
5. प्रतितालं–
6. तालैकमधमं–
7. द्राज्यर्द्धिः–
8. तदर्धं–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उपदण्डं वैणवं कुर्यात्पटोत्सेधसमं तु वा ।
हर्म्यतारार्धमानं वा रन्ध्रायामसमं तु वा ॥ १८२ ॥

ध्वजदण्डस्य चोत्सेधं[1] वेदभूतरसांशकम्[2] ।
उपदण्डस्य चोत्सेधं[3] प्रोच्यते तु शि[खि]ध्वजम्[4] ॥ १८३ ॥

षट्पञ्चचतुरङ्गुल्यं नाहमात्रप्रमाणतः ।
तस्योर्ध्वे योजयेद्विद्वान् यन्त्रयष्टिं विशेषतः ॥ १८४ ॥

वलयं चायसेनाथस्तर्ध्वं कृत्वार्धबुद्धिमान्? ।
हस्तमात्रायतं कूर्चमग्रे चैव तु योजयेत् ॥ १८५ ॥

दर्भमालाभिरावेष्ट्य सप्रदक्षिणमाचरेत् ।
अग्रादिमूलपर्यन्तं मूलादग्रान्तमेव वा ॥ १८६ ॥

वलये योजयेद्रज्जुं द्विगुणं मूलमाश्रितम् ।
कनिष्ठाङ्गुलिपरीणाहं तिवृत्त[5] कारयेद्गुह!? ॥ १८७ ॥

वृषस्य पुरतो वापि महापीठपुरोऽपि वा ।
वृषापरे पीठपृष्ठे गोपुरस्यापरे पुरे ॥ १८८ ॥

हस्तमात्रावटं खात्वा गोमयेनानुलेपयेत् ।
प्रोक्षयेत्कुशतोयेन चन्दनं चाक्षतं न्यसेत् ॥ १८९ ॥

हैमेन कच्छपं वाऽथ रौप्येण वृषभं तु वा ।
विष्णुं ध्यात्वाऽत्र वै वत्स! विन्यसेद्दण्डमूलके ॥ १९० ॥

---

1. चोत्सेधः–
2. रसांशकः–
3. चोत्सेधः–
4. शिखिध्वज !–
5. त्रिवृत्तं–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्थापयेदपरे विद्वान् प्रासादाभिमुखावृतान् ।
ध्वजवेदिं प्रकुर्वीत तत्तद्दण्डस्य मूलके ॥ १९१ ॥

शैलके चेष्टके[1] वाऽथ मृन्मये वाऽपि कारयेत् ।
अधिष्ठानसमुत्सेधं मध्यमं तस्य विस्तरम्[2] ॥ १९२ ॥

अथवाऽरत्निमात्रं[3] स्यादुत्सेधं[4] तदूद्वयं त्विति ।
उपानस्य तु यत्तारं पिकस्यैव तु तारकम् ॥ १९३ ॥

उपानात्पट्टिकान्तं च उत्सेधं[5] त्विति चोच्यते ।
तदूर्ध्वेऽष्टदलं पद्मं कर्णिका च[6] समन्वितम् ॥ १९४ ॥

दर्पणोदरवत्सर्वं गोमयेनानुलेपयेत् ।
शिल्पिनस्तु विसृज्याथ प्रोक्षयेद्धृदयेन तु ॥ १९५ ॥

मङ्गलाङ्कुरमावृत . . . ष्टकमावृतम्? ।
पूर्णकुम्भैरलङ्कृत्य यावदीपैरलङ्कृतैः ॥ १९६ ॥

कौतुकं बन्धयेत्सर्वान् सौवर्णेनाथ तन्तुना ।
एवं . . . सङ्कल्प्य प्रभाते विमले गुह ! ॥ १९७ ॥

नित्यसन्ध्यावसाने तु वृषभं शूलमर्चयेत् ।
पूजयेत्पूर्ववत्सर्वानग्निमूर्तिं समर्चयेत् ॥ १९८ ॥

---

1. चेष्टकायां–
2. समुत्सेधः मध्यमः तस्य विस्तरः–
3. मात्रः–
4. दुत्सेधः–
5. उत्सेधः–
6. कर्णिकया च–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शेषद्रव्याणि सर्वाणि होमयेत्तु[1] षडङ्गकैः ।
जयादिर[2]भ्यातानांश्च राष्ट्रभृच्च[3] क्रमाद्धुनेत्[4] ॥ १९९ ॥

वृषगायत्रिमन्त्रेण प्रायश्चित्तार्थकं हुनेत्[5] ।
प्राणाहुतिं ततो दद्याद्धोमयेन्मू[6]लमन्त्रतः ॥ २०० ॥

अग्निमूर्तिं विसृज्याथ प्रोक्षयेदस्त्रमन्त्रतः ।
ध्वजादिदेवान् सम्पूज्य तत्तन्मूलेन मन्त्रवित् ॥ २०१ ॥

पञ्चविंशतितत्त्वान्तं वृषरूपं षडानन ! ।
रागान्तं वैनतेय स्यात्तत्त्वं स्यात्पञ्चविंशति ? ॥ २०२ ॥

प्रणवं विन्यसेन्मूर्ध्नि उकारं मध्यमस्तके ।
क्षौकारं विन्यसेच्छ्रोत्रौ[7] शृङ्गारं[8] शृङ्गमूलके ॥ २०३ ॥

गकारं दक्षिणे नेत्रे यकारं वामलोचने ।
विकारं नासिकादक्षे[9] ह्मकारं तस्य[10] वामके ॥ २०४ ॥

हेकारं गलमध्ये तु वेकारमधरोष्ठके ।
दकारं तालुमध्ये तु वेकारमधरोष्ठके[11] ॥ २०५ ॥

---

1. जुहुयात्तु–
2. जयादीन–
3. राष्ट्रभृतं च–
4. क्रमाज्जुहुयात्–
5. जुहुयात्–
6. जुहुयान्मूल–
7. च्छ्रोत्रे–
8. शृङ्कारं–
9. दक्षिणभागे–
10. तस्याः–
11. अयं पादः एतत्पद्यपूर्वार्धद्वितीयपादस्य पुनरुक्तभूतः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दकारं तालुमध्ये तु [1] वकारमुत्तरोष्ठके ।
दाकारं दन्तपङ्क्तौ तु यकारं हृदये न्यसेत् ॥ २०६ ॥

धीकारं नाभिदेशे तु मकारं वृषणे न्यसेत् ।
ह्विकारं बीजदेशे तु तकारं दक्षिणे पिके [2] ॥ २०७ ॥

णकारं चापके दक्षे [3] पादे विन्यस्य षण्मुख ! ।
वृकारं पादमूले तु षकारं पृष्ठदेशके ॥ २०८ ॥

चोकारं पुच्छदेशे तु दकारं तस्य मध्यमे ।
चात्कारं लाङ्गुलाग्रे तु क्षकारं खुरमूलके ॥ २०९ ॥

एवमक्षरविन्यासं पुनरङ्गानि विन्यसेत् ।
यस्य शृङ्गादिवृषभे मन्त्रं न्यस्त्वा तु मध्यमे? ॥ २१० ॥

गन्धादीन् पूजयेत् पश्चाच्छलं चक्रं सरोरुहम् ।
घृतं शिरोर्पणं कुर्यान्निशिचूर्णं [4] समर्चयेत् ॥ २११ ॥

कूर्चानुद्धृत्य शिरसा धारयेत्सदनावृतान् ।
कुम्भाद्विषे [5] समादाय वाहनान् हृदये न्यसेत्? ॥ २१२ ॥

तत्कुम्भस्योदकेनैव प्रोक्षयेत्तान् स्वमन्त्रकैः ।
सर्वालङ्कारसंयुक्त[6]सर्वातोद्यत्यमायुतम् ॥ २१३ ॥

---

1. अयं पादः पूर्वश्लोकतृतीयपादस्य पुनरुक्तभूतः ।
2. दक्षिणस्यां स्फिचि-
3. दक्षिणे-
4. निशाचूर्णं-
5. कुम्भाद्बिम्बं-
6. संयुक्तं-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ग्रामप्रदक्षिणं कुर्यात्त्रिशूलेन समायुतम् ।
सकुम्भं च विकुम्भं च द्विविधं सर्वमेव च ॥ २१४ ॥

सकुम्भं ब्राह्मणस्योक्तं विकुम्भं क्षत्रियं तथा ।
शूलं चक्रं च पद्मं च केवलं शूलमेव च ॥ २१५ ॥

ध्वजान्तिकं न्यसेद्वत्स! दण्डाग्रे वा शिवाग्रके ।
स्थण्डिलं पूर्ववद्वत्स! न्यस्त्वा[1] पूर्ववदाचरेत् ॥ २१६ ॥

यष्ट्वा[2] यन्त्रक्रमेणैव बन्धयेत्सुदृढायतम् ।
घण्टां च पुष्पमालां च बन्धयेद्धृदयेन तु ॥ २१७ ॥

चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं ततः ।
नृत्तगानं च वाद्यं च शङ्खकाहलवादकैः ॥ २१८ ॥

जयशब्दं भेरिशब्दं[3] ब्रह्मघोषसमाकुलम् ।
वृषतालं तु सन्ताड्य ध्वजमारोपयेत्पुनः ॥ २१९ ॥

भिन्नं भिन्नं तथा जीर्णं सद्यो सन्त्याज्य[4] षण्मुख! ।
प्रायश्चित्तोक्तवत्कुर्याच्छान्तिहोमं समाचरेत् ॥ २२० ॥

ध्वजमन्यं गृहीत्वा तु लेखयेद्वृषदैवतम् ।
सनद्याधिवासनं? कुर्याच्छुद्ध[5]पुण्याहमाचरेत् ॥ २२१ ॥

---

1. न्यस्य-
2. इष्ट्वा-
3. भेरी-
4. सद्यः सन्त्यज्य-
5. च्छुद्धि-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्राह्मणान् भोजयित्वा तु क्षिप्रमारोपयेद्ध्वजम् ।
वृषकुम्भाभि[1]षिच्याथ ? दण्डमूले विशेषतः ॥ २२२ ॥

परिवारघटाश्चैव[2] तत्तद्दिक्ष्वभिषेचयेत् ।
पूजयेत्पूर्ववद्धीमान् गन्धादीनि[3] यथाक्रमम् ॥ २२३ ॥

वृषोच्छिष्टं ददेन्नित्यं[4] वन्ध्या वा रोगि[5] वाऽप्यथ ।
तत्पिण्डं प्राशयेन्नारी अपुत्री[6] पुत्रामप्नुयात ॥ २२४ ॥

व्याधिघ्नं सर्वदोषघ्नं वृषोच्छिष्टं शिखिध्वज ! ।
ध्वजदेवं वृषं विद्याद्धण्टानादं षडानन ! ॥ २२५ ॥

दण्डस्य विष्णुदेवत्यं[7] मालावेदमयं[8] तथा ।
विदिब्रह्मादिदैवत्यं ? पूजयेत्तु स्वनामतः ॥ २२६ ॥

वृष[9]वृषभदैवत्यं वृषनाथ[10] त्रिमूर्तयः ।
त्रिसन्ध्या[11]मर्चयेद्विद्वान् वृषगायत्रिमुच्चरन् ॥ २२७ ॥

---

1. वृषकुम्भयभि–
2. घटांश्चैव–
3. गन्धादिभिः–
4. दद्यान्नित्यं–
5. रोगी–
6. न्नारीमपुत्रा–
7. दैवत्यं–
8. वेदमयी–
9. वृषः–
10. वृषनाथः–
11. त्रिसन्ध्य–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथवा पूजयेद्वत्स! द्वौ सन्ध्यावे[1]कमेव वा ।
रात्रौ भेरिं[2] तु सन्ताड्य सर्वदेवप्रियार्थकम् ॥ २२८ ॥

भेरिकालक्षणं वक्ष्ये शृणुष्वैतत्तु षण्मुख! ।
खादिरं पनसं वापि आम्रं बिल्वं तथैव च ॥ २२९ ॥

जातिवृक्ष[3]शिरीषंच चम्पकार्जनमेव[4] च ।
असनं बकुलं चैव उशीरं चन्दनं तथा ॥ २३० ॥

द्विजा उशीरकाः प्रोक्ताः क्षत्रियं वकुळं तथा ।
न्यग्रोडं[5] वैश्यजातीनां प्लक्षं शूद्रस्य कीर्तिता? ॥ २३१ ॥

एवमादीनि वृक्षाणि[6] सारं सङ्ग्राह्य[7] यत्नतः ।
उत्तमं सप्ततालं स्यान्मध्यमं पञ्चतालकम्[8] ॥ २३२ ॥

अधमं च त्रितालं स्याद्भेरीयामं[9] त्रिधा भवेत् ।
. . . . यामसंयुक्तं[10] द्विमुखं च करिष्यति ॥ २३३ ॥

मुखयोर्नाहमुद्दिष्टं[11] द्वात्रिंशाङ्गुलमुत्तमम्[12] ।
अष्टाविंशदङ्गुलं . . . . ॥ २३४ ॥

---

1. द्विसन्ध्यमे–
2. भेरीं–
3. जातिवृक्ष–
4. कार्जुनमेव–
5. न्यग्रोधं–
6. एवमादयः वृक्षाः–
7. सङ्गृह्य–
8. उत्तमः सप्ततालः स्यात् मध्यमः पञ्चतालकः–
9. अधमश्च त्रितालःस्यात् भेर्यायामः–
10. एवमायामसंयुक्तं–
11. नाहि उद्दिष्टः–
12. द्वात्रिंशदङ्गुल उत्तमः–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

. . . . ।
. . . . . वद्वामस्य मुखं भवेत् ॥ २३५ ॥

भेरीमध्यमनाहं[1] स्यात् षष्टिमुत्तमं[2] भवेत् ।
मध्यमं तु[3] चतुष्षष्टि द्विषष्टिश्चाधमं स्मृतम्[4] ॥ २३६ ॥

भेरिकावलयं तत्र एकाङ्गुलमिति स्मृतम् ।
उत्तमं तद्विजानीयान्मध्यमं यवहीनकम् ॥ २३७ ॥

अधमं तुर्यवं[5] विद्धि ओष्ठमानं त्रिधा भवेत् ।
मध्य[6]तस्यावधौ तत्र क्रमेण कृशतां नयेत् ॥ २३८ ॥

उदरं सुषिरं चैव सर्वत्रैव तु कारयेत् ।
वलयं वक्त्रोपरि कुर्यात्ताम्रमायसमेव वा ॥ २३९ ॥

यवाधिकं तु वलयं ओष्ठोपरि समन्ततः ।
सुषिरस्य क्षयं युक्तं अष्टादशमवं? बुधः ॥ २४० ॥

सुषिरं सप्तदशं? चतुर्दशाधमं भवेत्? ।
अष्टादशे तु वामे तु दक्षिणेच समन्ततः ॥ २४१ ॥

वलयं ग्राह्य[7] यत्नेन तदलाभे तु काष्ठजम् ।
तिन्त्रिणीकरवीरं च अशोकाचावसन्निका? ॥ २४२ ॥

---

1. नाहः–
2. मुत्तमः–
3. मध्यमस्तु–
4. श्चाधमः स्मृतः–
5. मं चतुर्यवं–
6. मध्ये–
7. गृहीत्वा–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं यष्टि[1] समादाय वलयं तत्र कारयेत् ।
रज्जुना[2] वेष्टयेत्पश्चात्सुश्लक्ष्णेन[3] दृढीकृतम् ॥ २४३ ॥

सूत्रेण वेष्टनं कृत्वा यवान्तरमनन्तरम् ।
वलयं क्षालयेत्तत्र मनेन? सह योजितम् ॥ २४४ ॥

कपिलायनचर्मेण? जरावत्स यथापि वा? ।
गावं? वत्सं तु विप्रेन्द्र दोषमन्त्रं परीक्ष्य च? ॥ २४५ ॥

चर्म सङ्ग्राह्य[4] यत्नेन क्षालयेच्छुद्धवारिणा ।
अन्नकल्केन संयोज्य वलयेनैव संयुतम् ॥ २४६ ॥

संयोज्य मतिमान् सम्यग्वामादिक्रमयोगतः ।
चर्मणा वेष्टयेद्वक्त्रं चर्मसूत्रेण वेष्टयेत् ॥ २४७ ॥

वामवक्त्रे तु सर्वं स्यान्नवयन्त्रेषु योजितम् ।
यन्त्रलोहममुं चैव ताम्रमायसमेव वा ॥ २४८ ॥

यस्मिन् सुषिरसंयुक्तं दक्षिणे मुखसंस्थितम् ।
दक्षिणस्य मुखे चैव त्यक्त्वा तु चतुरङ्गुलम् ॥ २४९ ॥

यन्त्रस्यान्तेच वै कुर्यान्नवयन्त्रं प्रकल्पयेत् ।
चर्मसूत्रक्रमात्तेषु दक्षिणे बन्धयेत्पुनः ॥ २५० ॥

वामदक्षिणसंयोज्य? चर्मसूत्रेण बन्धयेत् ।
पिशितस्यापि विन्यस्य चर्मसूत्रेषु बुद्धिमान् ॥ २५१ ॥

---

1. यष्टिं-
2. रज्ज्वा-
3. त्सुश्लक्ष्णया-
4. सङ्गृह्य-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रत्येकं कल्पयेद्विद्वान् पिशितं तत्र योजयेत् ।
एवं कर्मक्रियायुक्तं लक्षणेन समन्वितम् ॥ २५२ ॥

भेरीं च विष्णुदेवत्यं [1] पूजयेद्विष्णवे नमः ।
दक्षिणे रुद्रमभ्यर्च्य वामे विष्णुं समर्चयेत् ॥ २५३ ॥

भेरीमध्ये ततो ध्यायेद्ब्रह्माणं लोककारणम् ।
अनन्तो वलयश्चैव चन्द्रार्कौ मुखबन्धनौ ॥ २५४ ॥

चर्मसूत्रेषु सर्वेषु वासुक्याद्याश्च देवताः ।
वागीश्वरी क्रिया कीर्तिर्लक्ष्मी[2]सृष्टिस्तथैव च ॥ २५५ ॥

विद्या कान्तिश्च दुर्गा च गणेशं च [3] तथैव च ।
वनयन्त्रेषु सर्वेषु पूजयित्वा स्वनामभिः ॥ २५६ ॥

अत्रिभृगु[4]वसिष्ठश्च काश्यपोदुम्बरस्तथा [5] ।
गौतमश्च भरद्वाज [6] अगस्त्यश्च पराशरः ॥ २५७ ॥

इंशकानवके सूत्रे देवतानां प्रकीर्तिताः? ।
चर्चपुटाश्रयोद्भूताः केचिच्चापपुटा श्रयाः ॥ २५८ ॥

इत्येवं मुखमाश्रित्य सर्वदेवगतादितः? ।
सर्वदेवमयं प्रोक्तं सर्वप्रीतिकरं शुभम् ॥ २५९ ॥

---

1. दैवत्यां–
2. लक्ष्मीः–
3. गणेशश्च–
4. अत्रिर्भृगुः–
5. काश्यपोदुम्बरौ–
6. भरद्वाजः–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

षोडशाङ्गुलमायामं? कोणे कौचोदकीं[1] न्यसेत् ।
भेरीं च जीवकाष्ठेन जीवं वै धर्मकाष्ठकम्? ॥ २६० ॥

जीवाजीवनजीवानां जीवस्थाने तु योजयेत्? ।
अजीवे जीव[2]संयोज्य ताडयेत्साधकोत्तमम्[3] ॥ २६१ ॥

चर्म चर्मेण सम्बन्धं? सिरेणासैर्यकं तथा? ।
कांस्यं कांस्येन वै वत्सं[4] वर्ण्यं कर्णेन भाषितम्? ॥ २६२ ॥

सुषिरं सुषिरेणैव प-शब्दाः[5] प्रकीर्तिताः ।
रात्रौ सन्ध्यावसाने तु मध्यरात्रेऽथवा पुनः ॥ २६३ ॥

शिवाग्रे स्थण्डिलं यष्टयै? कुर्याद्द्रोणाष्टशालिभिः ।
भेरिकापूर्वदिग्भागे शूलं पश्चिमके न्यसेत् ॥ २६४ ॥

अन्नलिङ्गं तथा चन्द्रशेखरं पश्चिमे न्यसेत् ।
प्रोक्षयेद्धृदयेनैव वाद्यकं पूजयेत्ततः ॥ २६५ ॥

आचार्यो भेरीं सन्ताड्य प्रासादेन तु मन्त्रतः ।
टमश्च टटमश्चैव टाटमश्च तथैव च ॥ २६६ ॥

टमस्त्रियस्फकेनैव? ताडयेत्प्रथमं गुह! ।
इदं विष्णिवति मन्त्रेण टट्टमं ताडयेद्बुधः ॥ २६७ ॥

तृतीयं टण्टमं ताड्यं ब्रह्मजज्ञानमन्त्रतः ।
एवं तु ताडयेद्विद्वान् वाद्यकं ताडयेत्ततः ॥ २६८ ॥

---

1. कौमोदकीं–
2. जीवं–
3. त्तमः–
4. वत्स!
5. पञ्चशब्दाः–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हस्ते तु ताड्यं शिवमन्त्रसिद्धान्
हस्तेन पुष्पाञ्जलिना प्रवेशान् ।
यत्सर्वतालं सुखघोषवाद्यं
गन्धं च पुष्पं च सुधूपदीपम् ॥ २६९ ॥

भवन्तु वेद्याञ्जलि दापयेत्तु
ताम्बूलमा-म्य[1] तु तं सुमन्त्रम् ।
सान्निध्यमुद्रां च दशोपचाराना-
ष्टादशानां गणदेवतानाम् ॥ २७० ॥

चराचरं भूतभूतेन्द्रगुप्तं
विंशद्विनैकं शिवयोगतीर्थम् ।
तदर्धमाह्वानसुराधिगानां
ध्वजोद्भृतं चैव तु शैवयोगम् ॥ २७१ ॥

चच्चपुटासम्भूताश्च केचित् ।
चाचपुटादिषु इत्येते प्रतितालं तु वाद्यकं तु विशेषतः? ॥ २७२ ॥

समं चैव द्रुवं[2] चैव अतिध्रुवसमं तथा? ।
तालं च प्रोक्तमार्गेण क्रमात्तालं वदेत्क्रमात् ॥ २७३ ॥

यक्षाश्च राक्षसाश्चैव तथा किन्नर एव च ।
नागाश्च पितरश्चैव गन्धर्वा गरुडस्तथा ॥ २७४ ॥

विद्याधरास्तु सर्वैते आगत[3]श्शीघ्रमेव वै ।
देवताश्च षडङ्गाश्च? सिद्धाश्चापि तथैव च ॥ २७५ ॥

---

1. माचम्य-
2. ध्रुवं-
3. आगता-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विश्वे द्विपाग्निवासाश्च आगताश्शीघ्रमेव वै ।
पर्वताश्च समुद्राश्च विद्याश्चैव विशेषतः ॥ २७६ ॥

सर्वे विद्याधराश्चैते आगताश्शीघ्रमत्र वै ।
भूम्यन्तरिक्षस्वर्गाश्च स्थलपातालवासिनाम्[1] ॥ २७७ ॥

ब्रह्मलोकनिवासाश्च महामेरुनिवासिनः ।
विष्णुपूजश्रयाश्चैव आगताश्शीघ्रमत्र वै ॥ २७८ ॥

मुनयः पितरश्चैव महेशोभुवि मानवाः ।
अन्यैश्च समयश्चैव आगतः[2] शीघ्रमत्र वै ॥ २७९ ॥

तस्मान्नैव[3] तु काले तु शङ्खधारासमन्वितम् ।
घोषयन्तः प्रयत्नेन पूरयन्तो दिशो दश ॥ २८० ॥

भेरीताडनमेवोक्तं बलिनामक्रमं शृणु ।
प्रथमं बलिताळं तु बलिमुद्दिश्य कारयेत् ॥ २८१ ॥

प्रथमं मञ्जिणितालं द्वितीयं वृषतालकम् ।
तृतीयं चन्द्रतालं श टङ्करी च चतुर्थकम् ॥ २८२ ॥

पञ्चमं चोत्कटं चव पुन्नितालं तु षष्ठमे[4] ।
शर्वरीसप्ततालं तु अष्टमं गरुडं तथा ॥ २८३ ॥

सप्तमं[5] तटप्रहारं स्याद्दशमं हंसतालकम् ।
दिक्प्रदक्षिणमावृत्य गोपुरेण प्रवेशयेत् ॥ २८४ ॥

---

1. वासिनः–
2. अन्ये च समयाश्चैव आगताः–
3. तस्मिन्नेव–
4. षष्ठं–
5. नवमं–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जयशब्दाद्बहिर्गच्छेद्घोषयेच्छङ्ककाहळे ।
इन्द्रस्य समतालं तु बद्धावणं तथानले ॥ २८५ ॥

यमस्य भृङ्गिणीतालं मल्लतालं तु नैरुते[1] ।
नवतालं तु वारुण्यां सर्वतालं तु वायवे ॥ २८६ ॥

कौशिकं तु कुबेरं स्यादीशान्ये बक्करी तथा ।
एवं प्रदक्षिणं कृत्वा उच्चरंस्तत्र घोषयेत् ॥ २८७ ॥

तालानां तु समाहूयादोष्टान्यं परीक्ष्य च? ।
ब्रह्मण[2]शूद्रकन्यायां जातः पारशवः स्मृतः ॥ २८८ ॥

स्वानुष्ठानपरो नित्यं तद्वद्देवस्य भक्तिमान् ।
रूपयौवनसम्पन्नः विशालकुशलान्वितः ॥ २८९ ॥

स्नात्वाऽऽचम्य शुचिर्भूत्वा शुद्धवासा जितेन्द्रियः ।
वस्त्रानुलेपनैः पुष्पैर्भूषणैरुपशोभिते[3] ॥ २९० ॥

यज्ञोपवीतसंयुक्तं[4] शिवदीक्षाभिषिक्तकः ।
तत्र व्रते च भेर्यादि ताळयेत्पुत्रमेव वा ॥ २९१ ॥

एवमेव द्विसन्धौ च[5] कृत्वा लोकस्य शान्तिकम् ।
आयुष्यं श्रीं[6] बलं चैव आरोग्यं पुत्रवर्धनम् ॥ २९२ ॥

---

1. नैर्ऋते–
2. ब्रह्मणः ब्राह्मणात्=ब्राह्मणात्–
3. शोभितः–
4. संयुक्तः–
5. द्विसन्ध्यं च–
6. श्रियं–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्येवं बलितालं तु राजा राष्ट्रस्य[1] वर्धनम् ।
लिङ्गबेरगणेशादीन् पूजयेत्तु विधानतः ॥ २९३ ॥

वास्त्वस्थानदेवतान् सर्वान् पूजा[2]द्विगणमाचरेत् ।
नवाहं वाऽथ सप्ताहं पञ्चाहं त्रियहं तु वा ॥ २९४ ॥

यागारम्भ[3] समारभ्य यथाविधि पुरस्करम्[4] ।
यागशालां ततः कुर्यादैशान्यां पावके तथा ॥ २९५ ॥

नैरृत्यां वायवे सोमे चन्तरालेऽथवा पुनः ।
सप्तहस्ताष्टहस्तं वा नवद्वादशकं तु वा ॥ २९६ ॥

समं वै चतुरश्रं तु मध्ये नन्दपदं कुरु ।
कूटं वा मण्टपं वाऽपि प्रपां वाऽपि प्रकल्पयेत् ॥ २९७ ॥

दक्षिणे दक्षिणद्वारमुत्तरे चोत्तरं तथा ।
प्रधानरन्ध्रमेवोक्तमन्येषां जालकाकृतिः ॥ २९८ ॥

विशेषमिति[5] विख्यातं[6] सर्वं सामान्यमेव तु ।
मण्टपं तु त्रिधा भाज्य[7] मध्यभागे तु वेदिका ॥ २९९ ॥

रत्निमात्रसमुत्सेधं दर्पणोदरसन्निभम् ।
परितश्चोपवेदिं तु चतुरङ्गुलमेव वा ॥ ३०० ॥

---

1. राजराष्ट्रस्य–
2. वास्तुस्थानां सर्वासां देवतानां पूजां–
3. यागारम्भं–
4. पुरस्सरम्–
5. विशेष इति–
6. विख्यातः–
7. विभज्य–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुण्डानि परितश्चैव नव पञ्चैक वा[1] पुनः ।
चतुरश्रं चतुर्दिक्षु विदिक्षु वृत्तकुण्डकम् ॥ २०१ ॥

इन्द्रईशानयो[2]र्मध्ये प्रधानं पद्मकुण्डकम् ।
पञ्चाग्निं चेत्तु वै वत्स! चतुरश्रं चतुर्दिशि[3] ॥ २०२ ॥

पद्मकुण्डं तथैशान्यं[4] कल्पयेदेवमेव तु ।
एकाग्निं चेत्प्रकुर्वीत पूर्वे वा दक्षिणेऽपि वा ॥ २०३ ॥

पश्चिमे चोत्तरे वापि कारयेत्तु शिखिध्वज!
लिङ्गपीठाकृतिं यावत्तावत्प्राधान[5]कुण्डकम् ॥ २०४ ॥

वृत्तं चेद्वृत्तकं सर्वे दात्रं[6] चेदाश्रमे व च ।
दर्पणोदरवत्कुर्यान्निम्नोन्नतविवर्जितम् ॥ २०५ ॥

गोमयेनोपलिप्याथ प्रोक्षयेत्पुरुषेण तु ।
षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव वा ॥ २०६ ॥

वितानेनोर्ध्वमाच्छाद्य दिग्ध्वजैश्च प्रकल्पयेत् ।
दर्भमालाभिरावेष्ट्य मुक्तादामैर[7]लङ्कृतम् ॥ २०७ ॥

स्तम्भानावेष्ट्य वस्त्रैश्च तरङ्गेणावृताद्बहिः[8] ।
शिल्पिनं तु विसृज्याथ पुनः पुण्याहमाचरेत् ॥ २०८ ॥

---

1. पञ्चैकं वा–
2. इन्द्रेशान–
3. चतुर्दिक्षु–
4. तथेशान्यां–
5. त्प्रधान–
6. सर्वमाश्रं–
7. दामभि–
8. णावृतान् बहिः–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्राह्मणान् भोजयेत्तत्र प्रोक्षयेच्छुद्धतोयकैः ।
वास्तुहोमं ततः कुर्यात्पर्यग्नीकरणं[1] कुरु ॥ ३०९ ॥

वाचयेच्छुद्धपुण्याहं[2] सपुष्पाक्षतशोभितम् ।
धूपदीपैरलङ्कृत्य मङ्गलाकुर[3]मावृतैः ॥ ३१० ॥

मङ्गलाधिपतिर्यष्ट्वा[4] ब्रह्मजज्ञानमन्त्रतः ।
तीर्थाङ्कुरार्पणं लब्ध्वा उत्सवस्य दिनादितः ॥ ३११ ॥

सायाह्नसमयारभ्य[5] चाङ्कुरार्ध[6] तथोत्सवम् ।
दीक्षितं[7] शिवभक्तैश्च अलाभे भूसुरैरपि ॥ ३१२ ॥

शिरोवस्त्रेण संवेष्ट्य पालिकादीनि कारयेत् ।
कुद्दालि वस्त्रमात्रैश्च भूषयेदप्यरानयेत् ॥ ३१३ ॥

नद्यां वापि[8] तटाके वा केदारे पर्वते वने ।
शुद्धस्नानमनुप्राप्य शोधयेदस्त्रमन्त्रतः ॥ ३१४ ॥

मृदं ग्राह्ये तु[9] वामेन पालिकादीनि पूरयेत् ।
अवटं पूरयेत्तत्र हृदयेन शिखिध्वज ! ॥ ३१५ ॥

---

1. पर्यग्निकरणं–
2. च्छुद्धिपुण्याहं–
3. मङ्गलाङ्कुर–
4. पतिं इष्ट्वा–
5. समये आरभ्य–
6. अङ्कुरार्धं–
7. दीक्षितैः–
8. वाप्यां–
9. गृहीत्वा–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ग्रामप्रदक्षिणं कुर्यात्प्रविशेद्यागमण्टपम् ।
मण्टपस्योत्तरे भागे स्थण्डिलं शालिना कुरु ॥ ३१६ ॥

अङ्कुरार्पणयेद्विद्वान्[1] पूर्वोक्तविधिना सह ।
शिवमाराधयेत्पश्चाद्यथावित्तानुसारतः ॥ ३१७ ॥

शिवाग्रे स्थण्डिलं कुर्यात्प्रोक्षयेदस्त्रमन्त्रतः ।
नवकुम्भान् समादाय त्रिसूत्रेण विचित्रितान् ॥ ३१८ ॥

पूरयेद्गन्धतोयेन स्थण्डिलोपरि विन्यसेत् ।
वर्धनीमुत्तरे स्थाप्य[2] परितोऽष्टघटानि वै[3] ॥ ३१९ ॥

ब्रह्मविष्णुघटान्न्यस्त्वा[4] विधिना कारयेद्गुह ! ।
पिधानकूर्चवस्त्राभ्यां सौवर्ण[5] पङ्कजान्वितान् ॥ ३२० ॥

वज्रादिशूलपर्यन्तं विन्यसेत्सुप्रदक्षिणम् ।
पद्मं चक्रयुतो[6] वाऽपि विधिना शूलमेव च ॥ ३२१ ॥

सौवर्णं रजतं ताम्रं दारुजेनैव वा[7] कुरु ।
लोहजेनायुधान्[8] कुर्याल्लक्षणेनैव कारयेत् ॥ ३२२ ॥

दारवं याज्ञिकैर्वृक्षैर्हस्तमात्रप्रमाणतः ।
नाहं च द्व्यङ्गुलं मानमात्रां गुल्फेन कारयेत् ॥ ३२३ ॥

---

1. रानर्पयेद्विद्वान्-
2. स्थापयित्वा-
3. घटांश्च वै-
4. न्न्यस्य-
5. सौवर्णे-
6. चक्रयुतं-
7. दारुजं वा-
8. लोहजादायुधान्-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रागादीशानपर्यन्तं विन्यसेत्तु शिखिध्वज ! ।
वस्त्रैर्गन्धैस्सुमाल्यैश्च धूपदीपैश्च पूजयेत् ॥ ३२४ ॥

कौतुकंशातकुम्भेन राजतं [1] वाऽथ तन्तुना ।
कारयेत्तु विशेषेण षोडशाङ्गुलमानतः ॥ ३२५ ॥

लिङ्गनाहसमं सूत्रं प्रधानं कौतुकं विदुः ।
स्थालिकां पूरयेद्वत्स ! तण्डुलैश्च तिलैरपि ॥ ३२६ ॥

भस्मताम्बूलसंयुक्तं मध्येपद्मं समालिखेत् ।
पुण्याहं पूर्ववत्कुर्याज्जनान् सर्वान् [2] प्रदापयेत् ॥ ३२७ ॥

नमोऽन्तं सर्पमन्त्रेण पूजयेत्कौतुकं गुह ! ।
त्र्यम्बकेन मन्त्रेण भस्मे[3]स्पृष्ट्वा तु कौतुकम् ॥ ३२८ ॥

शङ्खंच चक्रभारी च वज्रादीनि यथाक्रमम्? ।
चण्डेशं च विशेषेण बन्धयेद्वत्स ! वार्धकम् ॥ ३२९ ॥

एकबेर [4] द्विबेरं वा त्रिबेरं सर्वमेव वा ।
ग्रथितं कौतुकं यत्तु तत्कौतुकमुदाहृतम् । ३३० ॥

तेन कुर्यात्तु तीर्थं तमुत्सवं कारयेद्गुह ! ।
बृहत्सामेति मन्त्रेण त्र्यम्बकेनैव [5] मन्त्रतः ॥ ३३१ ॥

त्रिभिरावृतं नीत्वा दापयेत्तु मखे मुखे? ।
देवानां दक्षिणे हस्ते शक्तीनां वामके करे ॥ ३३२ ॥

1. रजतेन–
2. जनानां सर्वेषां–
3. त्र्यम्बकेण मन्त्रेण स भस्म–
4. एकबेरं–
5. त्र्यम्बकेणैवं–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शूलस्य मध्यमे पत्रे पद्मचक्रौ च[1] कण्ठके ।
बन्धयेत्कौतुकं तत्र भस्म दत्त्वा पृथक् पथक् ॥ ३३३ ॥

ताम्बूलं दापयेद्विद्वान् जनान् सर्वान् प्रदापयेत् ।
शिवकुम्भे शिवं ध्यात्वा वर्धन्यां तु मनोजनीम् ॥ ३३४ ॥

लिङ्गमूर्त्यां समावाह्य विन्यसेत्कुम्भमध्यमे ।
पीठात्मनि? न्यस्त्वा वर्धन्या विन्यसेद्गुह ! ॥ ३३५ ॥

लोकपालान्न्यसेदष्टकुम्भमध्ये षडानन ! ।
नवरत्नं पञ्चरत्नं विन्यसेच्छिववर्धनीम् ॥ ३३६ ॥

निष्कं[3] वाऽर्धहैमेन पङ्कजं विन्यसेद्घटे ।
चन्दनं चाक्षतं पुष्पं धूपदीपं निवेद्यकम् ॥ ३३७ ॥

देशिको मूर्तपैस्सार्धं पूजयेत्तु विशेषतः ।
शिवकुम्भं समादाय धारयेच्छिरसोपरि ॥ ३३८ ॥

शिष्याणां परिचाराणां धारयेत्स्थापनं क्रमात् ।
वज्रादिशूलपर्यन्तं शिवास्त्रं पुरतो न्यसेत् ॥ ३३९ ॥

विमानप्रदक्षिणं कुर्यात्प्रविशेद्यागमण्टपम् ।
स्थण्डिलं वेदिकामध्ये कुर्याद्द्रोणाष्टशालिभिः ॥ ३४० ॥

तदर्धं तण्डुलैर्भूष्य[4] तण्डुलार्धं तिलैरपि ।
लाजापुष्पैः[5] परिस्तीर्य स्थण्डिलं[6] नलिनं लिखेत् ॥ ३४१ ॥

---

1. पद्मचक्रयोश्च–
2. वर्धन्याम्–
3. निष्केण–
4. भूषयित्वा–
5. लाजपुष्पैः–
6. स्थण्डिले–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

योगेशं विन्यसेन्मध्येष्वन्येषामपि पूर्ववत् ।
पूजा[1] पूर्वोक्तविधिना सन्धादीनि यथाक्रमम् ? ॥ ३४२ ॥

चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं ततः ।
अघोरास्त्रं क्षुरिकास्त्रं जप्त्वा वै दक्षिणोत्तरे ॥ ३४३ ॥

नृत्तगेयैश्च वाद्यैश्च स्तोत्रध्वनिसमायुतम् ।
शिवादिलोकपालान्तांस्तत्तध्यानसमन्वितान् ॥ ३४४ ॥

तत्तन्मन्त्रेण सम्पूज्य यथोक्तविधिना गुह ! ।
अष्टमङ्गलरूपाणि परितः कल्पयेत्क्रमात् ॥ ३४५ ॥

दर्पणे तु उमादेवीं पूर्णकुम्भे तु जाह्नवीम् ।
वृषभे तु धरादेवीं कावेरी[2] युग्मचामरौ[3] ॥ ३४६ ॥

श्रीवत्से तु महालक्ष्मीं स्वस्तिके तु सरस्वती[4] ।
शङ्खे तु शक्तिदेवी[5] च दीपे स्वाहाधिदेवताः[6] ॥ ३४७ ॥

उर्वशी मेनका चैव रम्भा चैव तिलोत्तमा ।
सुमुखी सुन्दरी चैव कौमुखी कामवर्धनी ॥ ३४८ ॥

एते चाप्सरसाः[7] प्रोक्ता अष्टमाङ्गल[8]धारिकाः ।
मङ्गलाष्टकदेवानां एवमेवेति विन्यसेत् ॥ ३४९ ॥

---

1. पूजां-
2. कावेरीं-
3. चामरयुग्मे-
4. सरस्वतीम्-
5. शक्तिदेवीं-
6. देवताम्-
7. एताश्चाप्सरसः-
8. मङ्गल-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विताने चान्द्रदैवत्ये दर्भमाला सरस्वती[1] ।
दिग्ध्वजा[2]लोकरक्षेशान् यजेद्गन्धादिभिः सह ॥ ३५० ॥

शङ्खपद्मनिधिं चैव मुक्तादामादिदैवतम्[3] ।
अन्तस्तम्भचतुष्कोणे धर्मादीनां तु देवताः ॥ ३५१ ॥

अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
अग्निमूर्तिं समावाह्य विन्यसेत्कुण्डमध्यमे ॥ ३५२ ॥

शिवाग्निं कल्पयेत्पश्चाद्रूपवत्कारयेत्पुनः । ?
अष्टबाहु चतुर्वक्त्रं प्रतिवक्त्रं त्रिलोचनम् ॥ ३५३ ॥

शङ्खं शूलं च वज्रं च पताकां दक्षिणे करैः ।
वरदं त्वङ्कुशं पाशं घण्टां वै वामकैः करैः ॥ ३५४ ॥

रक्तवर्णनिभं वक्त्रं[4] देहं? सप्तजिह्वाभिरावृतम् ।
हिरण्याकनका रक्ता कृष्णा चैव तु सुप्रभा ॥ ३५५ ॥

अतिरक्ता बहुरूपाः सप्तजिह्वाः प्रकीर्तिताः ।
हिरण्यासद्यवक्त्रे तु रक्षायां[5] वामवक्त्रके ॥ ३५६ ॥

कृष्णा वै वामवक्त्रे तु[6] सुप्रभा पुरुषानने ।
अतिरक्ता बहुरूपा कनका चोर्ध्ववक्त्रके ॥ ३५७ ॥

---

1. चन्द्रदैवत्ये दर्भमालां सरस्वतीम्–
2. दिग्ध्वजान्–
3. माधिदैवतम्–
4. अत्र देहमिति पदमसङ्गतम्–
5. रक्तास्यात्–
6. कृष्णाचाघोरवक्त्रे तु–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सद्यादीशानपर्यन्तं जिह्वास्थानेति[1] चोच्यते ।
लौं घौं कां यौं ह्रौं ष्ट्रौं स्रौं—
जिह्वामन्त्रमिदं प्रोक्तं हिरण्यादि यथाक्रमम् ॥ ३५८ ॥

गन्धादिनाऽर्चयेत्सर्वांस्ततो होमं समाचरेत् ।
समिदाज्यचरुं लाजान् सर्षपं च यवांस्तिलान् ॥ ३५९ ॥

समिदाहुतिमीशानं[2] पुरुषेण घृताहुति[3] ।
चरुं हुत्वा अघोरेण लाजा वामेन हूयते ॥ ३६० ॥

सर्षपं हृदयेनैव शिखायां च यवाहुतिः[5] ।
कवचेन तिलं हुत्वा मुष्टिमात्रं पृथक् पृथक् ॥ ३६१ ॥

उत्तमं त्विति विख्यातं तदर्धं मध्यमाहुतिः ।
तस्यार्धमधमं ज्ञेयं प्रमाणं सर्वहोमयेत्[6] ॥ ३६२ ॥

शतमर्धं तदर्धं च प्रतिद्रव्यं तु हूयते ।
सर्वद्रव्यं समोपेतं हव्यवाहेति होमयेत्[7] ॥ ३६३ ॥

द्रव्यान्ते व्याहृतिं हुत्वा हुत्वा पूर्णाहुतिं पुनः ।
हवीष्टौ ? कृतान्ते तु[8] यदस्येति च होमयेत्[9] ॥ ३६४ ॥

---

1. जिह्वास्थानमिति–
2. मीशानेन–
3. घृताहुतिम्–
4. हूयन्ते–
5. यवाहुतिम्–
6. सर्वं जुहुयात् (अग्रेऽप्येवमेव)–
7. जुहुयात्–
8. कृत्वान्ते तु–
9. जुहुयात्–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इदं विष्णिवति मन्त्रेण त्र्यम्बकेनैव[1] हो[म]येत्[2] ।
ब्रह्मजज्ञानमन्त्रेण व्योमव्यापिदशाक्षरैः ॥ ३६५ ॥

गोरीमिमाय मन्त्रेण अतिरक्तेति हूयते ।
आप्यायस्वेति मन्त्रेण हूयतेति विचक्षणैः ॥ ३६६ ॥

ईशानः सर्वविद्यानां बहुरूपेति होमयेत्[3] ।
वज्र दिशूलपर्यन्तं तत्तन्नाम्नैव हूयते ॥ ३६७ ॥

जयादिर[4]भ्यातानांश्च राष्ट्रभृच्चाहुतिं[5] पुनः ।
पुन–त्र्यम्बकेनैव[6] प्रायश्चित्ताहुती दश ॥ ३६८ ॥

शिवप्रसाद[7]मन्त्रेण प्रणवेन पृथक् पृथक् ।
एकैक[8]माहुतिं हुत्वा व्याहृतिं जुहुयाद्गुह ! ॥ ३६९ ॥

पूर्णं तु मिश्रमन्त्रेण प्रति द्रव्यं षडानन ! ।
उत्तमादिक्रमेणैव समिधाकाङ्गुलानि च ॥ ३७० ॥

कलाङ्गुलं चोत्तमं प्रोक्तं मन्वङ्गुलं तु मध्यमम् ।
. . . . समिधायां तु लक्षणम्[9] ॥ ३७१ ॥

1. त्र्यम्बकेणैव–
2. जुहुयात्–
3. जुहुयात्–
4. जयादिम–
5. राष्ट्रभृदाहुतिं–
6. पुनश्च त्र्यम्बकेणैव–
7. प्रासाद–
8. एकैका–
9. समिदायामलक्षणम् (समिधायास्तु लक्षणम्)–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कर्षं कर्षार्थमात्रं च कर्षद्वयमथापि वा ।
उत्तमादिक्रमेणैव घृताहुतिमथाचरेत् ॥ ३७२ ॥

स्रुवपूर्णप्रमाणेन व्याहृतिं जुहुयात्पुनः ।
स्रुवयोगेन सम्पूर्णं पूर्णाहुतिमथाचरेत् ॥ ३७३ ॥

क्षीरं दधिमधुस्सर्पि[1]स्रुवपूर्णप्रमाणतः ।
अन्नमक्षप्रमाणेन मूलं? बिल्वस्य पत्रवत् ॥ ३७४ ॥

अपूपं च फलं चैव शमीपत्रप्रमाणतः ।
एवमेव प्रमाणेन होमं कृत्वाऽत्र षण्मुख! ॥ ३७५ ॥

होमान्ते बलिमारभ्य सर्वालङ्कारसंयुतम् ।
तरङ्ग? शिबिकायां वा रथे वारोपयेद्गुह! ॥ ३७६ ॥

वृषभं[2] पूर्वतो गच्छेद्यन्त्रदीपमनन्तरे[3] ।
गणेशं[4] यन्त्रलिङ्गं च यन्त्रदन्तिमनन्तरे[5] ॥ ३७७ ॥

यन्त्राश्च यन्त्रवाद्याश्च[6] यन्त्रनृत्तमनन्तरे[7] ।
देशिको बलिपात्रादि बलिद्रव्यमनन्तरे[8] ॥ ३७८ ॥

---

1. मधुसर्पिः–
2. वृषभः–
3. यन्त्रदीप अनन्तरम्–
4. गणेशः–
5. यन्त्रदन्ती अनन्तरम्–
6. यन्त्राणि यन्त्रवाद्यानि–
7. मनन्तरम्–
8. मनन्तरम्–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदन्ते चास्त्रमूर्तीनामन्त्रलिङ्गमनन्तरे[1] ।
चन्द्रमौलि[2] तदन्ते तु सोमास्कन्दमनन्तरे[3] ॥ ३७९ ॥

नन्दीशं[4] चापरे वाऽपि दूरेवाऽपि प्रकल्पयेत् ।
भक्तबिम्बास्तदन्ते तु ब्राह्मणानामनन्तपरेति च[5] ? ॥ ३८० ॥

नृपाणां च परे गत्वा वणिज्यानामनन्तरे[6] ।
शूद्राणामपरे गत्वा पाषण्डानामनन्ते[7] ॥ ३८१ ॥

व्रतिनां चापरे गत्वा योगिनां तदनन्तरे[8] ।
समयीनां[9] तदन्ते तु वाद्यनृत्तमनन्तरे[10] ॥ ३८२ ॥

भाषाष्टादशकं स्तोत्रै[11]र्नामालङ्कारसंयुतैः ।
बलिपात्रे समासेन बलिद्रव्यं विनिक्षिपेत् ॥ ३८३ ॥

चन्दनं चाक्षतं पुष्पं धूपदीपं[12] तथैव च ।
पाद्यमाचमनं चार्घ्यं पात्रे पात्रे निधापयेत् ॥ ३८४ ॥

---

1. मूर्तयः अस्त्रलिङ्गमनन्तरम्–
2. चन्द्रमौलिः–
3. सोमास्कन्दः अनन्तरम्–
4. नन्दीशश्चा–
5. ब्राह्मणानामनन्तरम्–
6. वणिजामनन्तरम्–
7. मनन्तरम्–
8. तदनन्तरम्–
9. समयिनां–
10. मनन्तरम्–
11. दशकस्तोत्रैः–
12. धूपं दीपं–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लड्डुका चैव मुद्गानां गलसत्तिल[1]पिष्टकम् ।
प्रथमेऽहनिदातव्यमविघ्नश्चेति मन्त्रतः ॥ ३८५ ॥

लोकपालान् समासेन बलिं नित्यं ददेद्[2]क्रमात् ।
निशि चूर्णं[3] यवं चैव पायसं तिलसंयुतम् ॥ ३८६ ॥

द्वितीयदिवसे दद्याद्ब्रह्ममन्त्रमनुस्मरन् ।
घृता च[4] तिलपिष्टं च कदलीफलसंयुतम् ॥ ३८७ ॥

तृतीयेऽहनि दातव्यं भूतमन्त्रमनुस्मरन् ।
निशिचूर्णं[5] नालिकेरं घृतोदन[6]शिखिध्वज ! ॥ ३८८ ॥

चतुर्थे दिवसे चैव गान्धर्वं मन्त्रमुच्चरन् ।
प्रियङ्गुघृतसंयुक्तमिन्द्रवल्ली शमी[7] तथा ॥ ३८९ ॥

पञ्चमेऽहनि पातव्यमैन्द्रमन्त्रमनुस्मरन् ।
वेण्वान्न[8] घृतसंयुक्तं सक्तुलाजा[9]विमिश्रितम् ॥ ३९० ॥

षष्ठमेऽहनि[10] दातव्यमृषीणां कुशया सह ।
शुद्धान्नं ब्रहती[11]युक्तं गुलसर्पिविमिश्रितम्[12] ॥ ३९१ ॥

---

1. गुलसक्ततिल–
2. बलिं नित्यं दद्यात्–
3. निशाचूर्णं–
4. घृतंच–
5. निशाचूर्णं–
6. घृतोदनम्–
7. मिन्द्रवल्लीं शमीं–
8. वेण्वन्नं–
9. लाज–
10. षष्ठेऽहनि–
11. बृहती–
12. सर्पिर्विमिश्रितम्–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नवमेऽहनि दातव्यं शैवमन्त्रमनुस्मरन् । ।
येषां द्रव्यमलाभे [1] तु शुद्धान्नं दधिसंयुतम् ॥ ३९२ ॥

प्रथमादिदिनान्तं [2] च बलिद्रव्यमिहोच्यते ।
प्रथमं [3] गणनाथस्तु द्वितीयं कमलासन [4] ॥ ३९३ ॥

द्वितीयं [5] भूतरात्रं च चतुर्थं गान्धर्वमेव च [6] ।
पञ्चमं च सहस्राक्षं [7] मुनीनां षष्ठमो [8] भवेत् ॥ ३९४ ॥

सप्तमं केशवं ज्ञेयमष्टमं राक्षसं तथा [9] ।
नवमं [10] शैवमेवोक्तं दिवसानां तु देवता [11] ॥ ३९५ ॥

इन्द्रादीशानपर्यन्तं विधिदेवान् [12] षडानन ! ।
गन्धर्वो प्रीतिदेवत्यमनलोज्वलनं तथा [13] ॥ ३९६ ॥

सोमदेवाश्च पञ्चैते बलिद्रव्याधिदेवताः ।
सावित्री शक्करी चैव जगती च गायत्रिकम् [14] ॥ ३९७ ॥

---

1. एषां द्रव्याणामलाभे-
2. नवान्तं-
3. प्रथमे-
4. द्वितीये कमलासनः-
5. तृतीये-
6. चतुर्थे गन्धर्व एव च-
7. पञ्चमेच सहस्राक्षः-
8. षष्ठे-
9. सप्तमे केशवो ज्ञेयः अष्टमे राक्षसस्तथा-
10. नवमे-
11. देवताः-
12. विद्धिदेवान्-
13. गन्धर्वः प्रीतिदैवत्यं अनिलोज्वलनस्तथा-
14. गायत्रिका-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रुद्रः पितामहो विष्णुरीश्वरः शिव एव च ।
विघ्नेशादीशपर्यन्तं भौतिकस्तदुदाहृतः ॥ ३९८ ॥

वैनवादिशिवान्तं तु यद्गौणं सम्प्रशस्यते ।
शैवे शैवाधिदेवत्यमेवं दिनाधिपः स्मृतः ॥ ३९९ ॥

दिनाधिदेवबीजं तु सन्धिदेवान् स्वनामतः ।
प्रणवादिनमोऽन्तं च मन्त्राः[1] प्रतिदिनं वदेत् ॥ ४०० ॥

बलिं दद्याद्विशेषेण दिनं प्रति दिनं प्रति ।
यागस्थानमनुप्राप्य पादप्रक्षालनं कुरु ॥ ४०१ ॥

आयुधानस्त्रमूर्तिं च विन्यसेद्वेदिकोपरि ।
अन्यलिङ्गं विसृज्याथ बाह्यपीठे विशेषतः ॥ ४०२ ॥

आस्थानमण्टपे वत्स! कौतुकं विन्यसेत्क्रमात् ।
दिने दिने विशेषेण भवानीं पूजयेद्गुह! ॥ ४०३ ॥

[2]उमया सहितं चन्द्रशेखरं प्रथमेऽहनि ।
सुखासनहरिरर्धं[3] द्वितीयदिवसे ततः ॥ ४०४ ॥

तृतीये चार्धनारी च[4] गङ्गावरं[5] तथैव च ।
कल्यानासुन्दरं चैव वृषारूढं तथैव च ॥ ४०५ ॥

---

1. मन्त्रान्–
2. अस्मिन्नुत्सवप्रकरणे चतुर्थषष्ठदिनयोरनुत्कीर्तनात् तद्दिनयोः कर्तव्योत्सवपरिचयो न भवति। किञ्च सप्तमाष्टमदिनयोः कर्तव्योत्सवौ व्युत्क्रमेण निरूपितौ वर्तेते।
3. सुखासनं हरेरर्धं–
4. नारीं व–
5. गङ्गाधरं–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चण्डेशानुग्रहमुमासंवादमूर्तिनम्? ।
नन्दिकेश्वरमारूढं पञ्चमे दिवसे विदुः ॥ ४०६ ॥

उन्मत्तभैरवाकारं विषाशी [1] त्रिपुरान्तकम् ।
अष्टमे दिवसे वत्स! उत्सवं तत्र कारयेत् ॥ ४०७ ॥

कौलिह कौलहारी च? गजोद्भिन्नार्धकं हरम् ।
सप्तमे दिवसे वत्स! विशेषं चोत्सवं गुह! ॥ ४०८ ॥

अष्टमे वा नवाहे वा उत्सवं तत्र कारयेत् ।
भुजङ्गत्रासरूपं वा भुजङ्गललितं तु वा ॥ ४०९ ॥

भुजङ्गभैरवं वाऽथ भुजङ्गवलयं तु वा ।
भुजङ्गकुञ्चितं वृत्तं पञ्चभेदमिहोच्यते ॥ ४१० ॥

पञ्चाहे वाऽथ सप्ताहे कारयेदङ्कुरार्पणम् ।
उत्सवं पूर्वरात्रौ च स्नपनं गन्धतोयकैः ॥ ४११ ॥

कौतुकं बन्धयेद्वत्स [2]! दिनदेवान् [3] विशेषतः ।
पूर्वाह्णे वाऽथ पराह्णे वा [4] प्रदोषे रात्रिकेऽपि वा ॥ ४१२ ॥

बलिहोम . . . . ना वत्स! कारयेच्छाम्भवोत्सवम् ।
आस्थानमण्टपे वेश्य [5] परिवेषक्रमेण तु ॥ ४१३ ॥

शिवाग्रे पश्चिमे बाह्ये दक्षिणे वा तथैव च ।
त्रिपथे चतुष्पथे वाऽपि सभास्थानेऽथवा पुनः ॥ ४१४ ॥

---

1. विषाशिनम्–
2. बध्नीयाद्वत्स!
3. दिनदेवानां–
4. वाऽपराह्णे वा–
5. उपवेश्य–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तीर्थतीरेऽथ केदारे चान्यदेशे मनोरमे ।
धामस्य[1] दक्षिणे सव्ये पूर्वे वा चोत्तरे ततः ॥ ४१५ ॥

धामस्य[2] दक्षिणे सव्ये दक्षिणाभिमुखं क्रमात् ।
सव्ये तु प्राङ्मुखो भूत्वा चास्थानमण्टपं कुरु ॥ ४१६ ॥

चतुर्विंशतिहस्तैर्वा हस्तैर्विंशतिरेव वा[3] ।
षोडशैर्द्वादशैर्हस्तैर्द्विजातीनामनुक्रमात् ॥ ४१७ ॥

विस्तारं सप्तधा कृत्वा प्राङ्मुखोदङ्मुखं क्रमात् ।
नवांशं मध्यमे कुर्याद्भित्तिपादार्धमानवित् ॥ ४१८ ॥

अथ . . . त्रिपादं वा मुखयाममिहोच्यते[4] ।
षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव वा ॥ ४१९ ॥

शतपादयुतान्तं वा कारयेद्देवमेव[5] तु ।
पञ्चपङ्क्तिस्त्रिपङ्क्तिर्वा[6] कारयेत्तु विधानतः ॥ ४२० ॥

मण्टपं वा प्रपां वाऽपि कारयेत्तु विशेषतः ।
अधिष्ठाननिवासस्य? मण्टपानां तु लक्षणम् ॥ ४२१ ॥

अन्तस्तम्भं चतुष्कोणं त्याज्यं सर्वत्र मण्टपम् ।
बाह्ये परिवृतान् छिदान् वैकर्तनादिकान् न्यसेत् ॥ ४२२ ॥

---

1. धाम्नः–
2. धाम्नः–
3. विंशत्यामेव वा–
4. मुखायाम इहोच्यते–
5. देवमेव–
6. पञ्चपङ्क्तिं त्रिपंक्तिं वा–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रपां कृत्वा तु सर्वाग्रे कलास्तम्भयुतैः क्रमात् ।
नारायणाय गोविन्दो वासुदेवं[1] तथैव च ॥ ४२३ ॥

माधवो मधुसूदं च[2] प्रद्युम्नश्चानिरुद्धकः ।
हरिवक्त्रो गदाधारी घाक्ष्यद्वयं ? तथैव च ॥ ४२४ ॥

देवामति ? तथा चैव श्रीवत्साङ्कं च शार्ङ्गिणम्[3] ।
मुञ्जकेशो मुरारी च[4] वैनतेयोपरि स्थितः ॥ ४२५ ॥

पुण्डरीकाक्षनामानि पूजयेत्प्रतिपादके ।
वितानदर्भमाल्यैश्च दिग्ध्वजैः परिलम्भयेत् ॥ ४२६ ॥

चतुर्वेदमयं सर्वे[5] गन्धाद्यैश्च समर्चयेत् ।
ब्रह्म[6]दैविकमानुष्यं पैशाचं च पदक्रमात् ॥ ४२७ ॥

ब्रह्मिरे[7] स्थापयेद्देवं चण्डेशं दैविके परे ।
मानुषे[8] नृत्तवाद्यादीन् पैशचे प्रैष्यकादिना[9] ॥ ४२८ ॥

रङ्गपूजा प्रकर्तव्यं[10] दक्षादेवि विबन्धयेत् ? ।
पादुकं[11] शङ्खपात्रं च अर्घ्यमाचमनं तथा ॥ ४२९ ॥

---

1. वासुदेवः–
2. मधुसूदनश्च–
3. श्रीवत्साङ्कश्च शार्ङ्गी–
4. मुरारिश्च–
5. सर्वं–
6. ब्राह्म–
7. ब्राह्मिके–
8. मानुष्ये–
9. प्रैष्यकादीन्–
10. प्रकर्तव्या–
11. पादुके–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गन्धं च वस्त्र[1]पुष्पं च धूप[2]दीपं तथाञ्जनम् ।
दर्पणं चामरं चैव–द्यादीनां तु धारयेत् ॥ ४३० ॥

प्रादक्षिण्यक्रमेणैव विन्यसेत्तु दिने दिने ।
मण्टपस्य तु तन्मध्ये–र्सिहमाननम्[3] ॥ ४३१ ॥

आसीनस्थं[4] महादेवं त्र्यम्बकेन[5] तु पूजयेत् ।
स्नपनं कारयेदह्नि आदिरात्रौ तु रात्रिके ॥ ४३२ ॥

प्रथमं[6] चन्दनं कुर्यात् द्वितीयं[7] कुङ्कुमं तथा ।
तृतीयदिवसे कोष्ठं चतुर्थे जातिगन्धकम्[8] ॥ ४३३ ॥

उशीरं चैव कचालं लवङ्गं चन्दनं तथा ।
कर्पूरचन्दनं हैमं युक्तं[9] षष्ठदिनं तथा[10] ॥ ४३४ ॥

एला चैव लवङ्गं च चन्दनागरुसंयुतम् ।
सप्तमा[11]दिवसे चैव गन्धमि[12]त्यभिधीयते ॥ ४३५ ॥

---

1. वस्त्रं–
2. धूपं–
3. मासनम्–
4. आसनस्थं–
5. त्र्यम्बकेण–
6. प्रथमे–
7. द्वितीये–
8. अभिषेकप्रकरणेऽस्मिन् पञ्चमनवमदिनयोः अकीर्तनात् तद्दिनसम्बन्धिद्रव्यपरिचयो न भवति ।
9. हेमयुक्तं–
10. दिने तथा–
11. सप्तमे–
12. गन्धइ–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वनं कुङ्कुमकर्पूरं कुटजातिमुरं तथा ।
हेमं चागरुसारं च[1] अष्टमे दिवसे गुह! ।। ४३६ ।।

कर्पूरचन्दनं चैव गन्धमि[2]त्यभिधीयते ।
पद्मं नीलोत्पलं जाति[3]मल्लिकाचोत्पलं तथा ।। ४३७ ।।

पाटकं चार्कपुष्पं च करवीरं च कं[4] तथा ।
नवैतानि च पुष्पाणि पूजयेत्तु दिने दिने ।। ४३८ ।।

गुग्गुलं च लघुं चैव कुङ्कुमं चन्दनं तथा ।
बिल्वानां चैव निर्यासं कर्पूरोशीरकं तथा ।। ४३९ ।।

मधु घृतगुलं मिश्रं सर्वेषु च षडानन! ।
दिने दिने विशेषेण धूपं दद्याद्विशेषतः ।। ४४० ।।

मुखवासं च ताम्बूलं ददेन्नित्यं[5] शिखिध्वज! ।
श्रृङ्गारहासकरुणाद्भुतस्य–भयानकम्[6] ।। ४४१ ।।

बीभत्सभूतशान्तिश्च[7] दिने दिने विशेषतः ।
नव नाट्यदिने कुर्याद्देवदेवस्य सन्निधौ ।। ४४२ ।।

षड्जं च ऋषभं चैव निषादं गान्धारदेवतम् ।
तथा मध्यमं पञ्चमं चेति कौमारं? चेति सप्तधा ।। ४४३ ।।

---

1. हेम चागरुसारश्च–
2. गन्ध इ–
3. जातिः–
4. पिच्छकं–
5. दद्यान्नित्यं–
6. शृङ्गारवीरकरुणाद्भुतहास्यभयानकान्–
7. बीभत्सरौद्रशान्तांश्च–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नवनाट्यं गमं? चैते गाना? सप्तस्वराः स्मृताः ।
भेरीं च मर्दलं चैव झल्लरी[1]मुखं तथा? ॥ ४४४ ॥

डुक्का डक्का च वल्ली च वेणु वीणा तथा नव[2] ।
कुर्यात्पञ्चमहायज्ञं [शब्दं][3] श्रावयेत्तु दिने दिने ॥ ४४५ ॥

काघ्नं[4] प्रथमं नाट्यं मण्डनं तु द्वितीयकम् ।
तृतीयं जलन्धरघ्नं त्वघघ्नं तु चतुर्थकम् ॥ ४४६ ॥

पञ्चमं दक्षयागं च षष्ठमं[5] तद्विलासकम् ।
सप्तमं कालकोपं च त्रिपुरघ्नं तथाष्टकम् ॥ ४४७ ॥

चण्डेशानुग्रहं पश्चान्नवैते दिनवाद्यकम् ।
नादं कालं च शब्दं च मानमर्दं तथैव च ॥ ४४८ ॥

तालं दिव्यं च नृत्तं च गाने घ[6]नवधा रसम्[7] ।
विघ्नेशादीशपर्यन्तं श्रावयेद्देवसन्निधौ ॥ ४४९ ॥

लक्षणेन तु कर्तव्यमलक्ष्यमशुभावहम् ।
तोरणं मकरं चैव पुष्पप्रभा तथैव च ॥ ४५० ॥

पुष्पदाम गजारूढं सिंहारूढं ततः परम् ।
यन्त्रलिङ्गं च रङ्गं च मृगयात्रा तथैव च ॥ ४५१ ॥

---

1. झल्लरीं–
2. डुक्कांढक्कां च वल्ली च वेणुं वीणां तथा नव–
3. अत्र शब्दमित्यधिकांशः–
4. कालघ्नं–
5. षष्ठं–
6. गाने च–
7. रसः–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं दिने दिने कुर्याद्गणेशादिशिवान्तकम् ।
रथारोहं विशेषेण कारयेल्लक्षणान्वितम् ॥ ४५२ ॥

सर्वालङ्कारसंयुक्तं सर्वातोद्यसमायुतम् ।
इक्षुदण्डं च खण्डं च पृथुकापूपमेव च ॥ ४५३ ॥

ग्रामप्रदक्षिणं कुर्याद्विघ्नेशं पूजयेत्ततः ।
दारुसङ्ग्रहणं कुर्याल्लक्षणेन समन्वितम् ॥ ४५४ ॥

रथं कृत्वाऽत्र वै वत्स ! दृढं वै शिल्पिना सह ।
गव्येन स्नापयेद्विद्वान् पुनः पुण्याहमाचरेत् ॥ ४५५ ॥

होमं कृत्वा चतुर्दिक्षु विधिना मन्त्रमाचरेत् ।
नानावस्त्रैरलङ्कृत्य गन्धमाल्यैश्च भूषयेत् ॥ ४५६ ॥

देवेशं गन्धतोयेन स्नापयेत्तु विचक्षणः ।
वस्त्रैराभरणैर्गन्धैः पुष्पधूपं च[1] पूजयेत् ॥ ४५७ ॥

पायसान्नं ददेत्पश्चा[2]त्ताम्बूलं च निवेदयेत् ।
तदग्रे स्थण्डिलं कुर्यात्पूर्वोक्तविधिना सह ॥ ४५८ ॥

लघुचन्दनकुष्ठं च घनं कर्पूरमेव च ।
उशीरं जातिपत्रं च बकुलं गुळमेव च ॥ ४५९ ॥

एतानि समचूर्णानि मर्दयेद्धिमतोयकैः ।
धूपयेदगरुं तत्र नववस्त्रेण वेष्टयेत् ॥ ४६० ॥

स्थण्डिलस्य तु मध्ये तु विन्यसेत्तु शिखिध्वज ! ।
पुण्डरीकाञ्जनं पूर्वे कुङ्कुमं दक्षिणे न्यसेत् ॥ ४६१ ॥

---

1. पुष्पधूपैश्च–
2. दद्यात्पश्चा–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्षुरिकां दक्षिणे भागे पादजालं तथोत्तरे ।
पादुकेन पुरीं त्यक्त्वा नववस्त्रेण वेष्टयेत् ॥ ४६२ ॥

स्थण्डिलस्य तु मध्ये तु विन्यसेत्तु शिखिध्वज ! ।
न्यस्त्वा कनकनैररुते[1] . . . . ॥ ४६३ ॥

बकपुष्पं हारकेयूरं विन्यसेद्वायुदेशके ।
यज्ञसूत्रं तथैशान्ये विन्यसेत्तु क्रमेण तु ॥ ४६४ ॥

कलाटपट्टमैन्द्रे तु कुण्डले पावके न्यसेत् ।
भस्माधारं तथा याम्ये बाहुमालां च नैररुते[2] ॥ ४६५ ॥

वारुणे पादकटकं नूपुरं वायवे[3] गुह ! ।
कर्णिका ? विन्यसेच्छत्रं चामरं चैशके न्यसेत् ॥ ४६६ ॥

गन्धादीन् पूजयेत्सर्वान्[4] कामबीजमनुस्मरन् ।
पुण्याहं वाचयेत्तत्र कौतुकं बन्धयेत्पुनः ॥ ४६७ ॥

धामप्रदक्षिणं कुर्यात्सर्वालङ्कारसंयुतम् ।
देवदेवि[5] विशेषेण भूषणादीनि[6] भूषयेत् ॥ ४६८ ॥

सुमुहूर्ते सुलग्ने तु गन्धमालेपनं[7] गुह ! ।
पूजयेत्पुष्पधूपाद्यैर्मुद्गान्नं दापयेत्ततः ॥ ४६९ ॥

---

1. कनकं नैर्ऋते–
2. नैर्ऋते–
3. वायव्ये–
4. गन्धादिभिः पूजयेत्सर्वैः–
5. देवं देवीं–
6. भूषणादिभिः–
7. गन्धेनालेपनं–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मुखवासं च ताम्बूलं दापयेद्धृदयेन तु ।
रथं वा [1] शिबिकायां वा रोपयेत्तु विशेषतः ॥ ४७० ॥

ग्रामप्रदक्षिणं कुर्यात्सभास्थाने प्रवेशयेत् ।
प्रातः काले चरेद्दवमास्थानं सम्प्रवेशयेत् ॥ ४७१ ॥

स्नपनं कारयेत्पश्चान्महाहविर्निवेदयेत् ।
नृत्तगीतं [2] च वाद्यं च स्तोत्रमन्त्रैश्च पूजयेत् ॥ ४७२ ॥

रथमारोपयेद्रात्रौ कुर्याद्ग्रामप्रदक्षिणम् ।
पुनःस्थानं प्रविश्याथ नवधा स्नापनोक्तवत् ॥ ४७३ ॥

प्रभूतहविषं [3] दत्त्वा स्थापयेत्पूर्वदेशके ।
बल्यन्तं चोत्सवं कुर्यात्पूर्वोक्तेन विधानतः ॥ ४७४ ॥

मृगयात्रां तु कर्तव्यं [4] तद्दिनापराह्नके ।
किरातार्जुनरूपं तु त्रिपुरान्तकमेव वा ॥ ४७५ ॥

ग्रन्थि कौतुकरद्रूपं तद्रात्रे स्नपनं कुरु ।
किरातरूपवत्सर्वान् विशेषान्वेषधारयेत् ? ॥ ४७६ ॥

गजं चाश्वमृगं चैव वराहं च पिकं पुनः ।
मयूरकुक्कुटादीनि [5] पक्षीन्नानाविधैर्ग्रहेत् [6] ॥ ४७७ ॥

---

1. रथे वा–
2. नृत्तं गीतं च–
3. प्रभूतं हविः–
4. मृगयात्रा तु कर्तव्या–
5. कुक्कुटादीन्–
6. विधैर्गृह्णीयात्–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धनुर्बाणं च खड्गं च छुरिकादीनि धारयेत् ।
केचिदूर्ध्वाश्रमे चैव केचिदूर्ध्वसमोऽपि वा ? ॥ ४७८ ॥

केचित्पिञ्छं तु सङ्गृह्य [1] शीघ्रं गच्छेत्समाकुलम् [2] ।
तद्रात्रौ चाधरात्रौ च बन्धयेत्कौतुकं हृदा ॥ ४७९ ॥

मूललिङ्ग च शूलं च सर्वान् बिम्बान् विशेषतः ।
तीर्थसङ्ग्रहणं चैव रात्रान्ते तु विचक्षणः ॥ ४८० ॥

स्नापयेदस्त्रराजानं [3] नव कुम्भान् विशेषतः ।
तीर्थं कुर्यात्तु तत्रैव नव वस्त्रेण वेष्टयेत् ॥ ४८१ ॥

गन्धादीनर्चयेत्पश्चान्नैवेद्य [4] दापयेत्पृथक् ।
प्रभाते विमलेधीमान्नित्यसन्ध्यावसानके ॥ ४८२ ॥

होमान्ते चोत्सवं कुर्यादास्थानमण्टपं नयेत् ।
तस्याग्रे स्थण्डिलं कुर्यात्पूर्वोक्तविधिना सह ॥ ४८३ ॥

स्थण्डिलं कारयेद्विद्वानस्त्रमन्त्रमनुस्मरन् ।
लूखलं [5] मुसलं शूलं स्थण्डिलोपरि विन्यसेत् ॥ ४८४ ॥

त्यक्त्वा पर्युषितं पुष्णं पूजां पूर्ववदाचरेत् ।
पुण्याहं तत्र कर्तव्यं [6] प्रोक्षयेदस्त्रमन्त्रतः ॥ ४८५ ॥

---

1. सङ्गृह्य–
2. गच्छेयुस्समाकुलम्–
3. राजं–
4. नैवेद्यं–
5. उलूखलं–
6. पुण्याहस्तत्र कर्तव्यः–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नववस्त्रेण लङ्कृत्य[1] लूखलं[2] मुसलं तथा ।
बिल्वमपामार्गं दूर्वाश्रीपत्रमूलया ? ॥ ४८६ ॥

वेष्टयेल्लूखलं[3] तत्र मुसलं च तथैव च ।
वाचयेच्छुद्ध[4]पुण्याहं घोषयेत्तु विचक्षणः ॥ ४८७ ॥

घृतशिरोऽर्पणं कुर्याद्दूर्वाङ्कूराक्षतैरपि ।
मूलं शूलं तथा बेरं लूखलं[5] न ददेत्क्रमात्[6] ॥ ४८८ ॥

सुशुष्कां रजनीं शुद्धां चूर्णं कृत्वाढकत्रयम् ।
तदर्धं मध्यमं ज्ञेयं तस्यार्धमधमं विदुः ॥ ४८९ ॥

तैलस्यैवं प्रमाणानि तथैव परिकल्पयेत् ।
लूखलं[7] विन्यसेच्चूर्णं निक्षिप्यं देशिकं पुनः[8] ॥ ४९० ॥

कर्तारसमयानां च दासीदासकुटुम्बयेत् ? ।
ताम्बूलैश्चैव चूर्णैश्च[9] तैलं चैव ददेत्क्रमात्[10] ॥ ४९१ ॥

नित्यनैमित्तिकं चैव एवमेव समाचरेत् ।
चूर्णोत्सवक्रमं कुर्यान्नवं तत्रैव विन्यसेत् ॥ ४९२ ॥

---

1. वस्त्रेणालङ्कृत्य–
2. उलूखलं–
3. उलूखलं–
4. च्छुद्धि–
5. उलूखलं–
6. दद्यात् क्रमात्–
7. उलूखलं–
8. निक्षिप्य देशिकः पुनः–
9. ताम्बूलं चैव चूर्णं च-
10. दद्यात् क्रमात्–

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पिधानकूर्चवस्त्राढ्यं विन्यसेत्तु यथाविधि ।
त्यक्त्वा प्रतिसरं पूर्वं सूत्रमन्त्रैव षण्मुख! ॥ ४९३ ॥

स्नापयेत्स्नपनं पश्चात्तीर्थस्नानमनन्तरे[1] ? ।
यत्तीर्थं तीरमावेश्य तत्तीरे दशदण्डके ? ॥ ४९४ ॥

शूलं च देशिकं चैव जनान् सर्वान् विशेषतः[2] ।
सह स्नानं तु यत्कुर्यात्सर्वपापैः प्रमुच्यते ॥ ४९५ ॥

शुद्धं शुद्धेति मन्त्रेण पूजयेदस्त्रदैवतम् ।
ग्रामप्रदक्षिणं कुर्याद्ब्रह्मघोषसमायुतम् ॥ ४९६ ॥

प्रविशेदालयं पश्चाद्यागमण्टपमाविशेत् ।
कुम्भान् कुण्डानि सम्पूज्य गन्दादीनि[3] यथाक्रमम् ॥ ४९७ ॥

पूर्णाहुतिं ततः कुर्याच्छेषद्रव्याणि[4] देशिकः ।
